पितारत्वानुगतप्रत्ययात् तारत्वमंदत्वे च न शब्दवृत्तिजाती सप्रतियोगिकत्वात्। न। पतारत्वमंदत्वयोर्विरोधः परावगकारस्तारश्वासीत् सर्व रामः
वमंदइदानीमिति समयभेदेन वस्तुभेदेऽन्योरेकत्र प्रतीतेः आरोपेन तारत्वारान्तहोम्य इति भेदप्रतीतिरेवीति चेत् न। धर्मिणोऽभेदे भासमाने १६

विशिष्टधर्मिभेदप्रतीतेस्तत्तद्विषयत्वात्। एकत्र घटे लोहितो पीतश्च्यामश्चासीदिति। प्रतीतिस्तु तत्तच्चनीत्रेणाग कारेणामेदृगकाराभिम
वान्नयोर्भेदः। नहि तद्देवतदभिमावकं। तद्देवतेनैव ग्रहणाग्रहणयोर्विरोधादिति वाच्यं तारत्वव्यंजकवायो। र्वत्वेन मन्दत्वव्यंजकवायोर्धर्मि
भवान्मदत्वस्याग्रहणात्। सतु तारमन्दरूपाभिन्नास्थ्वगकारो गकारः तत्रासम्भिन्नत्वे बाधकाभावात् तस्मादुपधर्मा एव तारत्वादयः शब्दग
तत्वेन भासन्ते दर्पणधर्मा इव मुखादौ न तु ग्रहणं चस्पर्शवत्कारेण कर्णशष्कुलीत्वगिन्द्रियेण। तारमन्दत्वं कारणतारत्वपाप्रत्युत्कर्षापकर्ष
स्योद्गतस्पर्शस्य च स्वीकारात्। श्रोत्रेणोच्चवावस्तुत्वादेर्यं च वायुधर्मग्रहस्तत्र योग्यत्वमनुपाधिः। अन्यथा श्रोत्रेणास्वगुणोनष्टत्वेन इन्द्रियेत
यादृशानां च क्षुर्वान्यापार्थिवरूपग्रहकमापार्थिवेन्द्रियत्वादुसनवादिसाधयिस्यात्। अथ योग्यो योग्ये न ग्रहणे स्वगुणाः परगुणो वा यो
ग्यता च फलबलेन कल्प्यते न हि श्रोत्रस्यापि वायुधर्मग्रहे तुल्यं। न च नारो गकार इत्यत्र वायोरप्रतीतिः वायुत्वेनाप्रति। तावपि तारत्वादि
नैव न प्रतीतेः रूपथा स्फटिके नाप्रतीतावपि योगोऽनके लोहित इति प्रतीतिः। ननु वायुशब्दयोस्त्वचा श्रोत्रेण चाग्रहे केन तारो गकार इत्या
रोप इति चेन्न। न तारोपगकार इत्यादौ पः किन्तु उभयेन्द्रियग्राह्ययोः संसर्गाग्रहात्संसर्गव्यवहारः। अस्तु वा त्वगिन्द्रियोपनीतस्य श्रोत्रेणारोपः
श्रोत्रेणोच्चतारत्वग्रहोऽपि फक्क। उत्पत्तिमत्त्वेनाभिहितं न प्रतीतिः। क्वचित् एवोपगकार इति मलभिज्ञानबाधितत्वात्। ननु प्रत्यभिज्ञैव जपाबाधिता

चि·श गत्वजातेरुपाधिको ऽभेदभ्रमस्य गकारे संभवतात्कृतमिति चेन्न गत्वजातेरसिद्धेः। भेदभासमानेऽप्यभेदप्रतीतिर्जातिमालंब्य तेन वा गका
रे भेदप्रतीतिरस्ति। तारत्वमंदत्वे अपि न भेदहेतू स एव तारः स एवेदानीं मंद इति प्रत्यभिज्ञानात् गकारानित्यत्वेपि तथा संभवतीति चेत्तन्न हि नि
१७ त्यत्वेपि करणात्स्फुलीत्वगोचरोपनीतेन वायुधर्मोत्सनैरूपाधित्वसंभवती। न च बाधे परप्रतीतिः उत्पन्नत्वेनैव तत्प्रतीतेः लोहितत्वेन जपा
कुसुमस्य स्फटिके। अस्तु वा प्रागनुपलभ्यमानस्योपलभ्यमानस्योपलभ्यमानत्वेनोत्पन्नस्य सादृश्येन तन्नोत्पत्तिमत्तारोपः। न चैवं घ
टादावपि नोत्पत्तिः सिद्ध्येदिति वाच्यं। कुलालव्यापारानंतरमनुभूयमानघटस्य तद्व्यापारात्प्रागननुभूयमानेन घटेन नाभेदाभासने किं
तु भेद एवेति तत्र प्रागसत्त्वेसौ न सत्ते सिध्यति। गकारे तु तत्प्रतीत्यनंतरं कंठताल्वादिव्यापारात्पूर्वमनुभूयमानगकारेणाभेदभ्रम
पातस दीपवज्जनकएवास्य पशुहृत्यमघते उत्कर्षवत्त्वे सत्यपकर्षवत्त्वात् माधुर्यवत् अतएवानित्यत्वमिति चेन्न। न तारत्वमंदत्वयोरुत्क
र्षापकर्षयोर्गकारे रत्वस्याप्रमासिद्धेः। सिद्धौ वा जातिसंकरभयेनोत्कर्षापकर्षयोर्जातित्वात् रसत्वश्रावणत्वव्याप्यधर्मानात्वेन रसशब्दसा
धारण्याभावात् अत एव स नातीयसाक्षात्कारप्रतिबंधकतावच्छेदकसामान्यमुत्कर्षः तत्प्रतिबध्यसाक्षात्कारविषयतावच्छेदकसा रम:
मान्यमपकर्ष इति साधारणो हेतुरपास्तः। तारत्वादेर्गकारजातित्वासिद्धेः साधनावच्छिन्नसाध्यव्यापकस्य जन्यगुणत्वस्य श्रोत्रत्वस्य वो १७

पाधित्वात् अप्रयोजकत्वाच्च । नहि कारणाधीनस्यैवोत्कर्षापकर्षे अपरममहदिति परमाणोश्च परिमाणं प्रत्येकं सत्त्वात् न चोभयस्यैक
त्र सत्त्वकारणापेक्षा एकैकवद्द्वयोरपि समस्तेकमेकैकत्वात् । स्यादेतत् ध्वंसो व्याप्यवृत्तिः । ननु तदिदानीं कृत्स्नपूर्वाकारो नास्ति विनष्टः कोला
हलमिति प्रतीतेः प्रत्यक्षमेव शब्दानित्यत्वविनाशाभावत्वं नोपपत्तिमत्तानुमानाद्यप्रत्यक्षप्रतियोगिकत्वाभावत्वेन हि प्रत्यक्षत्वं ध्वंसस्य
घटध्वंसवत् । ननु विनाशग्रहे प्रतियोगिसमवायिप्रत्यक्षत्वं तन्त्रं धर्माभावेऽपि प्रत्यक्षत्वापत्तेः । तदिन्द्रियग्राह्येऽपि प्रतियोगिसमवायिनि
गंधध्वंसाभावे योग्यग्रहणाच्चातीन्द्रिययोग्यत्वात् । स्पर्शनघटसंयोगध्वंसाप्रत्यक्षत्वापातात् । न च प्रतियोगियोग्यत्वं तन्त्रं वायुस्पर्शध्वंसोऽपि
प्रत्यक्षः स्यादिति वाच्यम् । आश्रयनाशजन्यस्य तस्य ग्राहकेन्द्रियसन्निकर्षाभावात् । किंच यस्य सत्त्वे यत्रानुपलब्धिविरोधितस्याभावस्त
त्रत्यघटस्येति योग्यानुपलब्ध्यर्थः । अत एव पृथिवीत्वाभावो जलपरमाणौ न प्रत्यक्षः प्रत्यक्षमहत्त्वाद्यभावः । अस्ति च तथा शब्दे तत्
स्य समवधाने च सत्त्वप्रतीतिप्रसंगात् । निरधिकरणाभावप्रतीतिर्नास्तीति चेत् । न इहेदानीं शब्दो नास्तीति प्रतीतेः तस्मात् यत्राधिकरणे द
शासमये च प्रतियोगिवर्तनं तत्र तदभावो निरूप्यते । अत एव प्रागभावोऽपि रूप्यत इत्युक्तम् । शब्दाभावस्य च श्रवणेन्द्रियसन्निकृष्टत्वा
न्नाप्रत्यक्षसन्निकर्षापेक्षा इन्द्रियविशेषणतया नाभावग्रहणमिति चेत् । न । अयोग्यत्वस्योपाधित्वात् अन्यथा गुणस्य सम्प्रयुक्तसम

विश०

वोपेनयहणादर्शनान्नसमवायिनश्शब्दग्रहः स्यादिति। मैवं। सत एव शब्दस्य व्यंजकविरहादनुपलब्धिमात्रं न तु ध्वंसः। नन घ्राप्ये
तरसकलतदुपलंभकसमवधाने तदनुपलब्धिरूपयोग्यानुपलब्धिरभावात्। प्रतियोग्युपलंभकव्यंजकवायोरभावात्। किं नष्टप्र
तीतिरपि त्वगिंद्रियोपनीतव्यंजकवायुस्पर्शध्वंसोपाधिकैव। वायुर्नोत्पादकः किंतु व्यंजक इति किंचिन्निगमकमिति चेन्न इदानीं श्रुतपू
१८ र्वो गकारो नास्ति विनष्टः कोलाहल इति प्रतीत्यनंतरं पुनः श्रवणे शब्दाकृतपूर्व एवायं गकारः पुनः स एव कोलाहलः हलहल इति प्रत्यभिज्ञानमे
व घटध्वंसप्रतीत्यनंतरं च न घटप्रत्यभिज्ञानमिति तत्र विनष्टप्रतीतिसाध्यैव सिध्यति। अत एव तारत्वमंदत्वमंदतरत्वप्रतीतीनां भ्रम
त्वकल्पनाहूरं प्रत्यभिज्ञानामात्रस्य भ्रमत्वकल्पनमित्यपास्तम्। एतासु तीव्रव्यभेदप्रत्यभिज्ञानात्। स्यादेतत्। शब्दः उपलसाध्यन्तद्नभि
व्यक्तत्वे सति तदनंतरमनुपलभ्यमानत्वात् पटवत्। अभिव्यंजकत्वं हीन्द्रियसंबंधप्रतिबंधकापनायकत्वात् इन्द्रियसंन्निधायकत्वाद्वा
कुड्यान्तरितेनैव घटादीनां तदुभयमपि शब्दे न संभवति नित्यसमवेतत्वेनावरणाद्यनपसन्निधापनयोरभावात् नापि श्रोत्रसंस्कारात्
। इन्द्रियसंस्कारकस्योन्मीलनालोकादेः सततिंद्रियसंबंधयोग्यसर्वार्थोपलब्ध्यनुकूलसंस्कारजनकत्वं दृष्टान्त हृत्वाहृत्वा पुरपि सकृदेव सर्वशब्दो राम:
पलब्ध्यनुकूलश्रोत्रसंस्कारमादध्यात् तथा च सर्वशब्दोपलब्धिः स्यात्। न उक्तं। सकृद्व संस्कृतं श्रोत्रं सर्वैः शब्दैरन्यकारणपेक्षत। घटादयो न्मीलिते

१८

चक्षुः पटं न हि न बुध्यते। अथान्वयव्यतिरेकाभ्यां कार्ये प्रतिनियतजनकजन्यत्ववच्छब्देपि प्रतिनियतव्यंजकव्यंग्यत्वमिति चेन्न। वर्णा हि न प्रतिनियतव्यंजकव्यंग्याः एकावच्छेदेन समानदेशत्वे सति समानेंद्रियग्राह्यत्वात्। घटैकत्वपरिमाणवत्। न चावयवसंयोगबहुत्वाभ्यां व्यंजकव्यंग्येन च यद्विनाउत्पलत्वव्यंजकदीपाव्यंग्यनत्न नीलिम्ना घटवृत्तिपृथक्त्वाव्यंजकव्यंग्येनैकत्वेन चाव्यभिचारः। अवयवसंयोगावयविनो नीलोत्पलत्वयोश्चासामान्याव्याप्यवृत्तित्वेनोत्पलत्वस्याधिकवृत्तित्वेनैकावच्छेदेन वृत्त्यभावात्। बहुत्वपृथक्त्वव्यंजकव्यंग्यत्वावयवत्व योरितिनपरस्परव्यभिचारिव्यंजकव्यंग्यत्वं अत एव नीलावलाकेत्यत्र रूपपरिमाणयोरपि। मिथ्याज्ञानवंशसंख्यापरिमाणयोर्द्वैतव्यभिचार इति मेवं वर्णाः प्रतिनियतव्यंजकव्यंग्याः श्रावणत्वे सति समानेंद्रियग्राह्यत्वात्। गंधवदित्यापादनं सत्प्रतिपक्षत्वात्। वस्तुतस्तु अनुपपा सिद्धस्य संभिन्नत्वेनाभेदसिद्धौ प्रतिनियतव्यंजकव्यंग्यत्वसाधकस्यैव बलवत्त्वात्। शब्दस्य शब्दजनकत्वं शब्दनाशकत्वं च वीचीतरंगन्याये नोत्पत्तिकल्पनं च कल्पनमेव शब्दस्य शब्दजनकत्वान्नाशकत्वाच्च असाधारणत्ववत्। एतेन सामान्यवत्त्वे सत्यस्मदादिबहिरिंद्रियप्रत्यक्ष त्वादित्यादिकमपास्तं। प्रत्यभिज्ञानवैवाकान्तशब्दत्वगत्वादेरसिद्धेश्चान्तस्याच्छेदे। नित्यो व्योमैकगुणत्वात्परिमाणवत् अश्रोत्रग्राह्यत्वाच्छब्द त्ववत्। विशेषगुणान्तरासमानाधिकरणैकवृत्तिगुणत्वात् तत्समपरिमाणवत् पृथिवीतरनित्यभूतविशेषगुणत्वात्। अथाकाशत्वस

चि॰श॰ तिनिसैकसमवेतत्वात्। जलपरमाणुरूपवत्। अभास्वरत्वे सत्यनात्मविशेषगुणत्वात् कालपरीमाणवत् विपक्षबाधकं च प्रत्यभि-
ज्ञानमेवेति। अत्रोच्यते। गकारादिरूपोऽनेकः। अस्ति हि शुकसारिकामनुष्यप्रभवेषु स्त्रीपुंसनपुंसकप्रभवेषु च गकारादिषु स्फुटतरवै-
लक्षण्यात् स्वरूपतो भेदप्रत्ययः। इक्षुक्षीरादीनां माधुर्यवत् न वैषम्योपाधिको भेदप्रतीतिः। न हि विदितं कुम्भस्य कुङ्कुमपांसुमाणानुरूपत्वमिति
१९ वत् स्त्रीपुंसप्रभवत्वमात्रभाविकमुपाधिः। इन्द्रियसन्निकर्षे स्त्रीपुंसादिभेदमविदुषोऽपि शब्दे भेदमत्ययात्। पतो नु मापतिशुकशब्दो-
पस्त्रीशब्दो मन्द इत्यादि। अन्यथा न्यायाश्रयात् तत्प्रभवत्वे ज्ञाते भेदप्रत्ययः। तस्मात् तदनुमानमिति। न च रूपाणामन्वयव्यतिरेकानुविधाना-
त्स्वरूपाणां सुखदीर्घवद् दोषपतितकमौपाधिकत्वं अन्यानुविधानाभावात्। अथ व्यंजकवायोर्वैलक्षण्यं शुकादिगकारादिगकारगतत्वेन
भासते। वायो रूपलब्धित्वे नैव रूपे गौरिति चेत्। गकारगतत्वे बाधकाभावात् न च। भेदस्य प्रत्यभिज्ञानं बाधकं न हि। स एव वस्तु कत्रावर्द्धः स एव स्त्री-
शब्द इति प्रत्यभिज्ञानं अन्यथात्वेऽपि ज्ञानभेदज्ञानाभावेन व्यक्तिविशेषानुमानं न स्यात्। न चाभिव्यंजकवायोरेव वैलक्षण्यं शुकाद्यव-
मायकत्वस्य गकारादिष्वतिलाघवात् न च वायोरपि अनुमितेर्न्नति वायोर्नानात्वं तस्मात् यथा कृष्णो गौः शुक्लो गौरिति भेदे भासमाने गवाकार- राम॰
नुगतप्रतीतिर्गोत्वमालम्बते तथा शुकादिगकारेषु भेदे भासमाने यो गकारोऽयमपि गकार इति बुद्धिर्गत्वमालम्बते इति प्रत्यभिज्ञाभेदप्रथा १९

चोपपद्यते किंवर्णत्वादिकं यदि न जातिस्तदा कोलाहलप्रत्ययो न स्यात् तथाहि नगरादौ बहुभिर्वर्णानामेकदोच्चारणे दूरस्थेनानभिव्य
क्तगकारादिवर्णविभागं कोलाहलमात्रं श्रूयते न चैतत्र वर्णानामस्पष्टध्वनिरूपस्याव्यक्तस्य व्यक्तिः संभवति तदभिव्यंजकभेरीनादनादस्या
वात् । न च वर्णाभिव्यंजका एव ध्वनिव्यंजकाः सन्निधाने विच्छूयमाणे वर्णेन तु वर्णामसणात् । न च वर्णाभिव्यंजकवायुभिरेव दूरे ध्वनिमा
त्रमभिव्यज्यते । कव्यंजकस्य गव्यंजनवत् निर्व्यंजनेऽसामर्थ्यात् । तत्सामर्थ्यसत्वादेरभावाच्च । न च तत्र शब्दत्वमेव प्रतीयते न शब्दः व्यक्तस्य
ग्रहे जातिग्रहात् । न वाभिव्यंजकवायोरेकोलाहलत्वेन प्रतीयते । शब्दत्वेन प्रत्ययात् । सन्निधावपि तथाप्रत्ययप्रसंगाच्च । गकारादिहेतवां
परस्परभेदग्रहात् कोलाहलधीरिति चेत् । नातेषु वैधर्म्याभावात् । तद्भेदोपस्थानाभावस्यासंभवोवात्तस्वरूपस्यग्रहणात् समीपे बहुगका
रेषु भेदाभावेन तद्ग्रहे कोलाहलधीप्रसंगाच्च । अनेकवर्णोच्चारणस्य तद्धेतुत्वे दूरेपि तत्प्रतीत्यापत्तेः । तस्माद्वर्णत्वगत्वादिजातिरूपे
णापेद्यग्रहणात् गकारादिग्रहेपि कोलाहलबुद्धिव्यपदेशौ । अस्ति च शब्दस्यैकोपि जातिविशेषः श्रोत्रग्राह्योपस्मात्माद्यादिदिग्देशे विशिष्ट
ग्राह्यव्यभवतमनुमीयते । अव्यपदेश्येत्वरहस्य क्षीरादिमाधुर्यावान्तरवत्त्वसत्वात् । अन्यथादिग्देशाविशिष्टशंखादीनां ग्रहे श्रोत्रस्यासा
मर्थ्यात् तत्प्रतीतिर्न स्यादेव तथापि गत्वादिनापरापरभावानुपपत्त्या शुकादिगकारेषु न जातिविशेष इति चेन्न शुककारादिषु कत्वादि

व्याप्यजातिभिन्नानया प्रत्येकं शुककककारादिषु शुकादिप्रभवत्वमनुमाय तद्व्यवहारः ननु शुकरककारादिष्वेकाजातिरस्तिशुकप्रभव
चिं॰श॰ त्वाद्यनुमापिका तद्व्यवहारश्च कारिकारत्वादिसंकरप्रसंगात् । एवं तु न नानाश्च ननुगतत्वेन ततोऽनुगतव्यवहारानुपपत्तेः अत एव कार
त्व मपि गत्वादिव्याप्यं नाना ननुगतं तत्रिष्वप्येषि मत्वसदृहस्य व्याप्यतावच्छेदकरूपाभिप्रायात् । न चानुगतव्यवहारानुपपत्तिः जाती
२० यसाक्षात्कारप्रतिबंधकतावच्छेदकत्वेनानुगतत्वे नगतत्वेन नानारत्वेषु अनुगतव्यवहारानुपपत्तिः जातीयसाक्षात्संभवात् । तदज्ञाने व्य
वहारासिद्धेः तारत्वमदत्वमदत्वेन जातीसप्रतियोगिकत्वादिति चेत् । तारत्वतारत्वादयउत्कर्षरूपाजातिविशेषाएव तिवाऽपगग्रह
माराएव गम्यते । न चोत्कर्षवदपेक्षा पर्यामधुरतरत्वादयउत्कर्षव्यवहारमितरमायेक्षाकुर्वतिनथामंदाद्यपेक्षया तारत्वादि
व्यवहारः उत्कर्षस्य जातित्वाद्न्योन्यासंभाषित एव गकारेषु नैव । अन्यथा सिद्धभेदप्रसंगत्वेन वत्सविशेषानुमानवलेन चजातिसि
द्धेः शुककत्वव्याप्यत्वानानात्वस्वीकारात् । तत्रापि वा पिवा पुत्रतित्वेशुकादिककारगकादिव्यंजकवायवोविजातीयत्वेवासंभाच
ककारव्यंजकवायुत्वव्याप्यपदिशुक्रवर्णाभिव्यंजकवायुत्वं तदाशुकगकारव्यंजकवायोनस्यात् अथव्यापकं तदा सर्वएव कव्यंजकवा राम॰
पव शुकवर्णाभिव्यंजकवायवः स्युः तस्माद्वायुवृत्तित्वेपि नानासांनानात्वमावश्यकं । अथास्तु स्त्रीपुंसादिगकारभेदस्तथापि यावद्गत
२०

भेदमननुभवति सा वर्णाः प्रत्यभिज्ञानमिति चेन्न । अस्तु सा हि विनाशप्रतीतौ सत्यामपि स एवायं ककार इति प्रत्यभिज्ञा च स्तिवनष्ट
नन्तरमथ्युत्पादिव शब्दप्रध्वानयोरुपदादिप्रतीतावभेदप्रत्यभिज्ञायोरन्यतरस्य परस्परं विहायान्यद्बाधकमस्ति न चानयोः परस्परं बाध्य
बाधकभावे विनिगमकम् । येनैकस्मान्नतत्वमाविरोधः स्यात् कथं वा भेदाभेदज्ञानयोरन्यत्राबाधधीरिति प्रतिबन्धकत्वपरिहाय प्रथमं
नयोरेकसत्वेऽप्यपरात्पत्तिनग्रह इति सङ्कटप्रविष्टतया प्रत्यभिज्ञानेन इति सत्वे प्रमाणमपि हेतुं न शक्यते । नन्वेवमुत्पत्तिमत्वा
दिनाप्यनित्यत्वासिद्धिः कथं इत्थं उत्पादादिबुद्धिप्रत्यभिज्ञायोस्तु ज्ञातीयत्वविरुध्यव्यवस्थापविषयभेदः एकविषयत्वे विरोधेनैका
नेन रमपराबुत्पत्तिप्रसंगात् । एवं च भेदाभासमानेऽप्रत्यभिज्ञायास्तज्जातीयत्वविषयोऽनपक्रमभेदः न चैवं तज्जातीयायमितिस्यात्तु
सोऽयमिति वाच्यं तज्जातीयत्वप्रतीतिरपि सोऽयमित्याकारदर्शनात् यथा सैवेयं गाथा यान्ते वेदमौषधं बहुभिः कृतमयापि प्रत्यहं क्रिय
प्रमाणमिस्तौ सा सैन हि तावत् तूर्णमात्रमानुपूर्वीजराणजनदीनां द्विषुनन्वानन्तात् । किंतु तदुच्चारणानन्तरमुच्चारणान्तरं तत्र नन
नरं ज्ञानं वा गत्वा नानेति नेहतो गाथापि नानेव । न च भेदाभासमाने उत्पादादिबुद्धिरेवान्यस्योत्सारादिकमवगाहते । गुणकाम
मत्वप्रतीतेर्नोत्तत्वप्रसंगात् । तवेष्टापत्तिः अभेदाभासमाने तेन द्विधर्मत्वेऽन्यमानुदयात् विनिगमकाभावेनोभयस्यापि यथार्थत्वाच्च

चि.श. ।कर्त्तर्हि तस्याः भेदो विषयः न च मध्यमेन न भेदमध्यास्त एव भेदस्त्वेत तद्ज्ञानात्क्वचित्साम्यात्तस्मात्त्वत्र भेदप्रतीतिस्तीर्हि तर बाधका
बाध्यात्तत्र प्रत्यभिज्ञैव भवति भवंती वा तज्जातीयत्वमालंबते न तु स्वात्त विशेषदर्शने भ्रमानुदयात् अपि च। यथा सत्वादि ध्वनीनां
मुत्पत्तिविनाशप्रसमयात्तारत्वादिविरुद्धधर्मसंसर्गाद्वा भिन्नत्वे सैवेयं गुर्जरीत्यादिप्रत्यभिज्ञा तज्जातीयत्वविषया तथा वर्णप्रत्यभिज्ञा
२१ पि अन्यथा ध्वनयोपि नित्याः प्रतिनियताः स्युः उत्पत्तिविनाशतारत्वादिप्रतीतीनां प्रत्यभिज्ञावलेनौपाधिकत्वात्। न च वर्णोत्पुनारत्वेनैव
भासमानाध्वनयस्तत्राभ्यपः संभवतीति न हि ध्वनिषु वर्णास्तज्जनककंठताल्वाद्यभिघाताभावदिति वाच्यं। वीणाद्वारणास्थापामापे
गुर्जरीत्यादिजनकानामभावात् तस्मात्तदुत्पत्तिविनाशतारत्वादिप्रत्ययस्य प्रत्यभिज्ञानस्य च तुल्यत्वेद्वयोरपि नित्यत्वमनित्यत्वं वा
न चोभयोरपि नित्यत्वमेति। उक्तन्यायेन प्रत्यभिज्ञायास्तज्जातीयत्वविषयत्वात्। किंच यदि व्यंग्यः शब्दः स्यात्तदा वायुसंयोगाभावे वट
स्येव व्यंजकाभावे शब्दस्यानुपलंभात् संशयः स्यात् नास्ति इदानीं शब्दो नास्तीति निश्चयः। तस्माद्दूरतोऽतिनिरोधानित्सो वा सत्वेमस्तु
त्पत्तिमत्वात्। अस्मदादिबहिरिंद्रियग्राह्यत्वे सति जातिमत्वात्। अस्मदादिप्रत्यक्षगुणत्वाद्वा आत्मैकत्वप्रत्यक्षत्वपक्षे विशेषणत्वा शप:
त्व्यापकसमवेतप्रत्यक्षविशेषगुणत्वात् व्यापकसमवेतप्रत्यक्षविशेषगुणत्वात् अनात्मप्रत्यक्षगुणत्वाद्वा अस्माहतित्वात् ईख २१

स्त्रानं च न तथा तत्प्रयोजककारणाभावात्। कदाचिदिंद्रियव्यवस्थादेहेतुत्वगणत्वात् भूतमस्य क्षयगुणत्वात्तत्कर्षापकर्षशब्दप्रव
त्तिनिमित्तजातिमत्ताहेसादिशि। सत्वादिव्याप्यजातेर्नानात्वेपिताहशशब्दप्रवृत्तिनिमित्तस्य साधारण्यात्।। न च। त्वसाधनाव
च्छिन्नस्य पक्षधर्मावच्छिन्नस्य वा साध्यस्य व्यापकः स्पर्शावत्समवेतत्वमुपाधिः सर्वत्र वर्णात्मकशब्दपक्षीकरणेप्यमगुणे
प्वनित्येषु ध्वनिषु साध्याव्यापकत्वात् स्पर्शवत्समवेतत्वस्य पक्षमात्रव्यावर्तकत्वेन पक्षेतरत्वाच्चेति। पदं वर्णा एव न नित्यसत्ताकेवकथापु
रुषविवक्षाधीनानुपूर्व्यादिविशिष्टवर्णसमूहरूपाणां पदानां कुतस्तरां तत्समूहरूपवाक्यस्य कुतस्तमां चातत्समूहस्य वेदस्येति। त
थापि परतंत्रपुरुषपरंपराधीनतया प्रवाहविच्छेदमेव नित्यं तान्त्रूमइति चेत्। नास्मत्साचारानुमितामोशाखानामुच्छेददर्शनात्। इति
वर्णा नित्याश्चाः स्यादेतत्। विवादास्पदं वेदोऽधिका स्मृतिः स्मृत्यर्थानुभवजनकवेदमूलत्वाच्च विगीतमहाजनपरिगृहीतस्मृतित्वात् प्रत्य
क्षवेदमूलस्य निवारणं विदमूलत्वं वेदजन्यानुभवजन्यत्वं। ज्ञानद्वारावज्ञायमानस्य वेदस्य स्मृतिहेतुत्वयानुमाने। कुचिदस्य वज्ञाना
च्छिन्नव्यवहितस्य पठेनानुकारणाकारणता। वेदस्येव स्मृतिसंधानेस्मृतिप्रयानात्। वेदार्थस्मृतितावपतिक्षिप्तिसिद्धास्मत्सर्पथश्चस्म
ज्ञित एवोपस्थितः न च स्मृत्यर्थबोधकवेदानुमाने नास्मदस्यर्थरूपवेदार्थस्य विषयत्वाहूदो नुवादकः ज्ञानान्तरोपनीतस्य विशेषणा

तेनविशिष्टबुद्धिसंभवात्।पाकजनैमानसप्रत्यक्षापाकस्यसंज्ञासंज्ञिज्ञानेसंज्ञायाःज्ञानायथार्थत्वेनतदनुव्यवसायेऽप्रम
चि॰श विषयस्यैव।अन्यथान्यात्ज्ञातिज्ञासंकरापत्तिः नचैवंद्रव्यार्थोऽनुमानस्यविषयःतस्यासिद्धत्वेनाजनकतयास्मृतत्वाव्यापकत्वात्।
संबंधेऽतीतत्वमनुमेयएव। अनुमितादर्थमवधार्यस्मृतिपरायणसंभवात्नन्वासंसारमप्रतिहतस्यमवेदसंबंधितो भिन्न
क्रिमोमौनिश्लोकवदभिप्रायतोवाऽनुपूर्वीहीनमात्रस्यनिरर्थकत्वात्ज्ञानजनकसमभिव्याहारस्यानैकत्वेविशेषानुमानाद्वि
२२ त्तिचेन्न।न।स्वस्वार्थज्ञापकत्वेनैवज्ञातस्यवेदस्यस्वार्थानुभावकत्वात्।नहिशाब्दबोधेनिपतत्पदानुपूर्वीहेतुःव्यभिचारात्।पदस्य
वर्णविशेषानुपूर्वीनियमेऽपित्तद्वर्णानुपूर्वीकपदाविशेषत्वेननहेतुत्वेहस्तकरेत्यादिपदानाप्रसक्तेर्व्यभिचारात्।किंत्वव्यभिचारात्।किं
त्वव्यभिचरितत्वदर्थज्ञापकत्वेनज्ञातस्यत्वात्घवादावश्यकत्वाच्च।तदर्थज्ञापकत्वज्ञानायोमचक्रचिह्नणकमस्वरविशेषणामुपयो
गः अतएववर्णलोपादौकुत्रामानयोतिसकारसन्देहेलिपावुच्चारणेवाहस्तकरसंदेहोपिवाक्यार्थबोधः ननुक्रमिकपदवत्त्ववा
क्यत्वेनचात्रपदक्रमस्यानुपार्यमाणानयोच्चारणाधीनस्यपुगपदनुमीयमानतयानुपाधीनस्यवातस्यभावादिति।चेन्न।नहिक्रा राम:
मिकपदवत्त्वंवाक्यत्वंगोरश्वइत्यादावभावात्।किंतुविशिष्टार्थपरशब्दत्वंतच्चात्रास्त्येव।अध्ययनश्रूयमाणस्यनवाक्यत्वेनवार्थानु २२

भावकत्वमिति चेत्। न। लिप्यनुमितानामपि वाक्यत्वादर्थबोधकत्वाच्च लिपितुल्या च स्मृतिः किंच वाक्यमुच्चार्यते न तूच्चारणाद्युपकत्वे अन्यथा
वाक्यमुच्चारयेदित्यत्रानन्वयापत्तिः अनुच्चारितमेतिश्लोकश्च वाक्यं न स्यात्। अनुच्चारणदशायां वर्णानां वाक्यत्वे कस्यापि सत्त्वमेव स्यात् एकदा नावस्था
नामुच्चारणाभावात्। न च कृतक्रियमाणकरिष्यमाणोच्चारणस्य वाक्यत्वसमुदाये मस्येकस्याभावात्। तस्मादर्थविशेषज्ञापकत्वेन वर्णानादर्थ
विशेषधीः। अत एवास्ति वह्निलिंगमिति शब्दात्प्रतीतस्य मेनवह्नेरनुमानं। मतु मदर्थज्ञापकस्येन ज्ञानं तत्पदार्थज्ञानमात्रस्यात्र तु संसर्गधीः। घटः
कर्मत्वं मानयनं भावना तद्बोधकमिति ज्ञाने पि घटमानयेति वाक्यादिवदन्वयबोधाभावात् एवं चान्वयप्रकारकप्रमत्वाद्युपस्थापकविभक्त्यादि
मत्पदविशेषस्य तदुच्छापितकांक्षादेरज्ञानं वा सार्थधीहेतुतेन तेन विनाज्ञापकत्वमात्रेण ज्ञाता तादृक्संस्कारादेर्धीहस्तकरात्तदसंदेहे कुशमा
नये साधौ विभक्त्यादिज्ञानादेव वाक्यार्थानुभव इति भेदेन हि मनन्ह विभक्त्यादिमत्पदविशेषत्वेन वाक्यार्थधीहेतुत्वेन ननुगमात् किंतु घटः
कर्मत्वमित्याद्यनयविशेधिपदानुपोपाधिनिःतथा। सा वेदाप्यास्ति। वस्तुतस्तु नानार्थदासंदार्थोपस्थितिसजातवाक्यार्थवाधसोनतत्व घेतथे
वसामर्थ्यात् अनुमितवेदाक्यार्थानुभवे विलक्षणो वसामस्य सर्थज्ञापकत्वेन वज्ञातस्यासत्यार्थानुभावकत्वात् धर्मिग्राहकप्रमाणेन तथैव तत्
स्य सिद्धत्वात् तत्वज्ञस्य वा शरीरस्य कर्तृत्वे। अत एव वर्णायदविभक्त्यादिविशेषघटितत्वेनाज्ञातस्यापि वाक्यस्य स्वरवर्णस्य वा वाक्यार्थानुभावकत्वा

वि·प्र न पदार्थ इत्स्थानीयस्तु वाक्यार्थः। तत्र वर्णसमूहः पदं पदसमूहो वाक्यमिति सर्वापि न तो ग्रहः प्रमाणान्तरं वृत्तमात्रेणान्तस्य सिद्धेः अन्यथा लक्षणहेतु
विनानसोनुभावकरस्यादो न तत्सिद्धा वाक्यपासिद्धिः सिद्धो बाधः तेन विनैव सर्वानुपपत्तिः परिहृत्य तद्नुभावकत्वस्य बधिर्मिग्राहकमानासि
द्धत्वात्। अत एव स्तुतिनिंदात्मककल्पितविधिनिषेधकवेदादर्थमाधिगत्य प्रवृत्तिनिवृत्ती अन्यथा विधिनिषेधकानां नानाप्रकारकत्वेन विभक्ता
२३ दिविशेषवत्सदृश्यानुमानानुमत्रकत्वान्न नतोर्थधीः स्यान्नतथापि वचनज्ञानानुमानानन्तरमिवानुमितानुमानादेवा कार्यसिद्धेला किं वाक्यवद्वेद
स्यानुवादकत्वस्या नेने [illegible]चेत्। न। धर्मिग्राहकमानेन तत्स्वार्थज्ञापकत्वपाज्ञानपेत्तस्यतत्सामग्रीकत्वेनानुपदमेव वाक्यार्थबोधो स्यात्।
अपेक्षणीयानामभावात्। अनुमानस्य व्याप्त्यादिज्ञानपेक्षितत्वेनाविलंबितत्वान्न च वेदस्यापि योग्यतादिज्ञानापेक्षितया विलंबः तन्निरपे
क्षबोधकस्यैव धर्मिग्राहकमानसिद्धत्वात्। योग्यतादिशिष्टस्यैवानुमानाहुः। एवं मंगलाचारस्याविगीतशिष्टाचारत्वेन कार्यतामनुमापसाक
र्तव्यतावेदबोधितालौकिकाविगीतशिष्टाचारकर्तव्यतात्वादि तित दबोधकत्वेनानुमितवेदात्कर्तव्यताधीः ततः प्रवृत्तिः ननु सदाचारो
वेदबोधितकर्तव्यताकः नादृष्टाचारत्वादिति तद्बोधकत्वेनानुमितवेदात्कर्तव्यताधीः ततः प्रवृत्तिः ननु सदाचारो वेदबोधितकर्तव्यताकः रामः
नादृष्टाचारत्वादित्यनुमितवेदात्कर्तव्यताधीः विभक्त्यादिकं विनानुमितवेदात्कर्तव्यताज्ञानाभावात्। मंगलमाचारोदितेवरूपस्य वेदस्य २३

वानुमानं तथा व्याप्त्यभावात्तस्मात्स्पकर्तव्यतामनुमापयन्बाधकवेदानुमानं प्रथमं कर्तव्यताज्ञानेऽपि वेदानुमाविनाभावात् । न च तत्तत्रैव प्रत्य
क्षवेदानुमानेन प्रत्यक्षवेदोच्छेदानुपपत्तेः शास्त्रवत्त्वात् । यत्तु स्पष्टकोः कर्तव्याः कार्यास्तथाकारस्यैव रूपमेव वाक्यमनुमेयं छिन्नत्वात् । एवं चानेन
वार्थप्रतिपत्त्यसमर्थवेदानुमानेन दोषः एकार्थानेकपदोपच्छिन्नो वानेकवाक्यानुमानमेवेति । तत्र आचारतो वेदानुमाने मंगल्यमाधरेदिसा
घन्यतरेयच्छिन्नो नियमाभावात् अनेकवेदकल्पने च स्वानुभवविरोधः । मन्त्रस्मृतिमूलं वा नेकवाक्यं नावश्यकमिति कथमाधुनिकोनेक
मनुमानेन वस्तु स्वार्थबोधको वेदः स्मृतिसदृशएवानुमेयः नियमतः स्मृतेरूपच्छिन्नत्वादिति वाच्यं । तदर्थस्मृतेरपि नानामकारकत्वात् ।
तस्य च प्रदोषादाचतुर्वातस्यैव वेदत्वेश्रोत्रग्रहणाहतया चराद्युत्तवाक्यत्वमर्थबोधकत्वादिसेत्तदवयुक्तं । स्मृत्याचारेषानुमितेन वेदोऽर्थं
बोधयतीति एवं पूर्वेणानुमितवेदाऽन्तरोऽन्तरोऽस्त्वेसाचार । विनिगमनाविरहपरंपरास्पतत्र प्रमाणमूलकत्वात् शब्दार्थशङ्कैयद्ववतनस्माद्विस
नुमेयत्वं वेदस्यानेनोच्छेदस्याती ॥ छ ॥ ॥ स्वर्णोत्तमते ॥ ॥ उच्छिन्नवेदादर्थप्रतीतस्स्मृत्याचारयोरूपपत्तेर्नैसामग्र्यन्तरकल्पनेऽत्र तए
वनाश्रयसिद्धिर्वाधो वा स्मृत्याचारानुमितस्य वेदस्याभिरूपगमात् इदानीं च स्मृतेरर्थप्रतीत्याचाराद्वे कर्तव्यतामनुमापयत्प्रवृत्तिः । न चैवं वि
वेदनं तिवाक्यं तुल्यत्वात् । अविनाभावाच्च न कल्पने तुल्यं । तथा च स्मृत्याचारयोर्वेदजन्यत्वभवमूलत्वानुमभावादेव पक्षधर्मताकल्पासपक्ष

चिं॰ग्रा

वेदमूलत्वसिद्धिः। अन्यथा तस्यानुभावकस्याभावेन मूलत्वानुपपत्तेः। तस्मान्मन्वाद्याचारानुमितो वेदः प्रत्यक्षोऽध्ययनविषयश्चेद्वेदत्वात्
स्मृतवत्। अन्यथा सामर्थ्यानर्थक्यकल्पने गौरवप्रसंगः। ननु स्मृतिनिंदार्थवादेन कल्पितात् विधिवाक्यात् कथमर्थभेदेन गम्य प्रवृत्तौ न हि तत्र वर्णा
यदविभक्तिविधिप्रत्ययक्रमविशेषणामनुमानसंभवति। व्यभिचारादिति चेत् न स्मृतिनिंदावाक्याभ्यां प्रवृत्तिनिवृत्तिहेतुरर्थ एव कल्प्यते ला
२८ ततस्तु विधायकनिषेधकवाक्यगौरवात् उक्तदोषात् स्वपत्रवार्थवादादिवत्तदर्थाधिगमः तत्र निमित्तस्मृतिसादौ तत्र न तत्कल्पनापि। अथ तस्याध्य
यनविषयत्वे शाखान्तरवद्बहुभिर्मध्यविभिराध्यात्मिकशक्तिसंपन्नैरधिपमाणशाखाया उच्छेदासंभव इति चेत् न। एकस्य न सकलशाखाध्य
यनशक्तिरिसेकेनवापौरोपितदनध्ययने शाखोच्छेदसंभवात्। एकानधीतयान्यपराध्ययनविषयत्वनियमे मानाभावात्। शाखात्वस्यैव प्रत्य
क्षशाखात्वस्याप्रयोजकत्वात्। यद्यपि सहस्रशाखवेदविदो व्यासादयः संत्येव तथाप्यध्ययनाभाव एव शाखोच्छेदः। ननु शाखोच्छेदे वर्णाप
द्वा महानिशंकया प्रत्यक्षवेदादपि वाक्यार्थप्रयोरविस्मये वैदिकव्यवहारमात्रं लुप्येतेति चेत् न श्रूयमाणमात्रस्यैव महाजनपरिग्रहीत
त्वात् तन्मात्रबोधितानामेतिकर्तव्यतये वाशिष्टैरनुष्ठीयमानत्वाच्च तदर्थं निष्प्रयात् न चोच्छिन्नशाखाबोधितेतिकर्तव्यतानाशकर्पेक्षेमिकत्रापिक राम॰
र्मण्यनाश्वासप्रसंगो नानाशाखेतिकर्तव्यतापरत्तिपत्वात्तस्येति साम्प्रतं। संनिहितत्कर्मणो नानाशाखाबोधितसकलेतिकर्तव्यता २८

बोधनयेनमेवकालक्रमभाविनमनाश्वासमृग्वेकमानैर्महर्षिभिः प्रणीता महाजनपरिगृहीताः स्मृतयइतिनानुपलंभासंभवः अस्मर्थैकस्य
सकलशाखानवगमाच्छाखान्तरबोधितेतिकल्प्यमानासंशयेनैकशाखातोनार्थनिश्चयः स्यात्। पनु विभक्त्यादिमत्त्वस्यदानांतत्समुदायानां
वप्रत्यक्षत्वेनेप्युपिकल्पिहेदः तत्रापिसमुदायोवर्ण्यस्वानिश्चयएवनित्यानुमेयार्थः। वेदत्वंतत्रानुमेयमितितत्रप्रत्यक्षवेदशाखिकृ
ताकोऽतद्भिप्रणीतानां महाजनानांवेदत्वाभावनिश्चयात्॥ अतएववेदत्वेनतेनानुमेयेबाधात्तद्विशिष्यपक्षासत्त्वानाहूणमेवेदनाजनकत्व
चवौदत्वेनासुमेयत्नजनकत्वस्यप्रत्यक्षत्वात्। नाध्ययनविषयत्वेनतद्भावात्तज्जातिरनभ्युपगमादिति। स्यादेतत्मत्स्यसाचारपोवेद
मूलत्वेनत्वोच्छेदादिविवादः। तदेवतत्सिद्धं। तथाहि। वेदसमानार्थोमहाजनपरिगृहीताचस्मृतिः स्वार्थोपस्थितसनन्तरस्मृत्यर्थानु
भावकवेदानुमानेलिंगंतथाहि। चप्रथमप्यात्साध्यप्रसिद्ध्यर्थमुपस्थितात्सस्मृतेरेवार्थकोदिवाकार्थज्ञानमस्मातिंवेदेनतदर्थस्य
स्मृतितएवसिद्धेः। अपरंस्यशब्दैकवेद्यत्वेधत्वेनस्मृतितोज्ञानस्यज्ञापकत्वेनानुवादकतापत्तेश्चसावस्मृत्यपरादिसनादिविस्मृ
तिधारावश्यकीअन्यथाननुस्मृतः एवंतथापिवेदानुमानंनस्यात्। सर्वावस्मृतिः स्मृतित्वमवाक्यार्थप्रमाणत्वेनमहाजनपरिगृ
हीतत्वेनचप्रमाणमितितिनायंपरापत्संप्रसाचस्मृतिः स्मृतिमूलतानुमिताऽनुमितवेदवत्स्यात्तन्नेनुभावकत्वात्। वेदार्थस्मृतिता

वि॰ श्रु॰ प्रसिद्धिस्तु प्रत्यक्षवेदमूलस्मृतिसाहचर्येणानुमानप्रत्यक्षवेदवाबोधितलोभमात्रमूलस्मृतावपि । तान्त्रिकाणां लिङ्गाभासजन्यवेद
मूलकत्वभ्रमाद्वा भवतीति न सम्भवन्मूलान्तराणां वेदमूलकत्वकल्पनमिति । अथ स्मृतीनां विनष्टवेदमूलत्वात्प्रसिद्धिरपि महाजनपरिग्र
हीताः एवं च सा वेदमूलत्वनिश्चायिका । अविगीतमहाजनपरिग्रहेण वेदमूलत्वप्रसिद्धिर्यात्प्रत्यक्षवेदमूलस्मृतौ तत्प्रसिद्धिवत् । एवं वे
२५ दार्थस्मृतिताप्रसिद्धिरपि अन्यथा महाजनपरिग्रहानादरवेदस्मृतयोः विप्रमाणपनस्यादित्यवेन तानि । एवं वेदार्थस्मृतीनां प्रसिद्धि
पहस्यादिस्मृतेस्तामसिद्धौ अपि चारादिकर्मलोभादिना एवं सम्भवतो विचारकाणां तत्र विप्रतिपत्तिश्चात च न तत्प्रसिद्धेर्विगीतमहा
जनानामिति चेत् । अत्रापि मूलान्तरसम्भवादिप्रतिपत्त्याविगीतमेव तेषामतः एव स्मृतीनां मायमूलत्वे सम्भवति वेदमूलत्वप्रसिद्धावपि
न वेदमूलत्वं । न च वेदमूलत्वेयमिति कुत्रास्मृतौ महाजनपरिग्रहान्मूलत्वं वेदमूलेयमिति प्रथमं ज्ञातुमशक्यत्वात् शक्यत्वे वा किमनुमा
नेन । एवं च वेदमूलत्वेन प्रकारेण महाजनपरिग्रहः प्रसिद्धेः । सत्त्वादिस्मृतित्वेन एवं महाजनपरिग्रहेणोन्नेयः परिग्रहादनुष्ठानाद्युप
पत्तेः । एवं लाहौकाद्याचारोऽपि वेदलिङ्गेनैव कर्तव्यताज्ञानोपपत्तेः । किं वेदेन तदर्थस्य लिङ्गादेवोपपत्तेः । विगीतानां लौकिकविषयाशि राम:
ष्टाचारस्य वेदमूलत्वदर्शनात् वेदानुमाने चाविगीतशिष्टाचारत्वेन भोजनाद्याचारोऽपि वेदमूलः स्यात् तद्वद्विनापि तत्कर्तव्यताधीसम्भ २५

यान्ननन्तर्थं वेद इति रहापि तुल्यं। आचारकर्त्तृत्वमतानुमानयोरनादित्वेनाचारणांकर्त्तृत्वानुमानमूलकत्वात्त्रापि परंपरा।
न च एतत्तानुमानसापेक्षमुत्तरानुमानमिति स्वतन्त्रप्रमाणमूलकत्वाभावात्। साध्याविपक्षधर्मतासत्वेन सर्वेषां स्वतन्त्रप्रमाणत्वात्।
नापीनरप्रामाण्याधीनस्य वेदस्य प्रामाण्यमिति निरपेक्षत्वप्रत्यक्षादेरपि तथात्वापत्तेः। एतेन विगादपरमावाराणे निरपेक्षप्रमाणम्
लकः अविगीतमहाजनाचारत्वात्प्रत्यक्षवेदमूलाचारवदिति निरस्तं। अनुमावस्य निरपेक्षप्रमाणत्वात् प्रमाणमूलत्वेनेव
हेतोरुपपत्तेः निरपेक्षत्वस्य गौरवेणाप्रयोजकत्वाच्च। न च सापेक्षत्वेन न प्रामाण्यतान्यास्याविसत्वात्। अन्यथा प्रमाणेनैरपेक्ष्यस्य
वैयर्थ्यात्। न चाचारे वेदमूलत्वप्रसिद्धेस्तादनुमानेऽप्रसिद्धेर्व्यभि। चाराद्यस्य चोपपत्तेश्च। न च वेदमूलत्वेन महाजनपरिग्रहस्तथा। न
हि वेदमूलोयमिति कृत्वा महाजनानां तत्परिग्रहः वेदमूलत्वस्य प्रथमं ज्ञातुमशक्यत्वात्। शक्यत्वे वा किमनुमानेन। न च वेदमूलत्वे
नैव महाजनपरिगृहीतो प्रमाणमिति ज्ञात्वा तत्र महाजनपरिग्रहः। गौनवादसिद्धेश्च एवं महाजनपरिग्रहादेवोत्तरेषां परिग्रहानुष्ठानो
पपत्तेः। नादृशस्मृत्याचारयोर्वेदमूलत्वे न व्याप्तिर्वेदसिद्धिरिति चेत्तन्न। असंभवन्मूलान्तरत्वस्योपाधित्वात्। अन्यथा लोभमूलत्व
प्रसंगः। अस्तु वा स्मृत्याचारयोरनादित्वं न वा तथापि स्मृत्येराचारस्य च परंपरामूलभूतप्रमाणाभावादिति वा अस्मृत्याचारयो

वि·श·

२६

रूप्रयोरपि प्रमात्वात् अन्यथा नन्ततो वेदानुमानमपीति उच्यते पर्वं एवं स्मृत्याचारयोरुच्छेदात् । सर्गादौ नित्यसर्वज्ञेश्वरप्रणीतत्वे वेदमू
लत्वे स्मृत्याचारयोः अन्यथा मूलाभावेनान्धपरंपराप्रसंगः चेन्न मन्वादीनामतीन्द्रियार्थदर्शित्वतद्वापपत्रवशादिदानीमसत्वात्
पूर्वं एवं सर्गसिद्धसर्वज्ञत्वादपरावृत इति चेत् । न प्रमाणाभावात् । स्मृत्याचारयोः प्रमाणान्मूलत्वमेव तत्कल्पकमिति चेन्न । प्रतिसर्ग
मेषामन्यान्यकल्पने गौरवमित्येकस्यैव नित्यसर्वज्ञस्य कल्पनात् । न च स्मृत एव तत्प्रणीता । तासां मन्वादिकर्तृकत्वेन स्मृतौ बोधात्तस्य
मौन विदमूलत्वस्मरणाच्च । एवं च स्मृत्याचारयोर्महाजनपरिग्रहाद् वेदमूलत्वसाधकमपि भगवति प्रमाणम् अत एव प्रतिमन्वन्तरं चैषा
श्रुतिरन्या विधीयत इत्यागमोऽपि । एवं च चाएवं प्रत्यक्षवेदमूलावेव स्मृत्याचारौ अथैव कालक्रमेण पुराणप्रवल हायग्रहधारणादिश
केरहरहरपचीयमानत्वात् तदध्ययनविच्छेदेन शाखोच्छेदात् स्मृत्याचाराभ्यामेव कर्तव्यतामधिगत्य प्रवृत्तिः । न चैवं स्मृतिरस्तु वेदमूला
मंगलाद्याचारस्त्वीश्वरादेव भविष्यति घटादिनिष्पादितसंप्रदायवदिति चेन्न । बहुव्यापारव्यवहितत्वात् तदाचारस्य गुरुत्वेन मंगलमाचरि
सादिवाक्यस्यैव लाघवेन कल्पनात् । न च मंगलादिपदशक्तिग्रहार्थमाचार आवश्यक इति वाच्यम् । स्वर्गादिपदवद्वाक्यार्थ नन्त
उपपत्तेः अन्तस्य परवचनमात्रात् संप्रतिपत्तिस्तु च न आचारः परीक्षकाणाम् । तस्य च वेदत्वमेव प्रमाणीतत्वेन शक्तिग्रहणार्थमित्व

एम:

२६

नेव्यभिचारान् किंतु तन्मूलकाचारस्य वेदमूलत्वनियमादिति ।। ॥ स्यादेतत् । प्रलये समस्तमेवमेतन्नस्स एव तु नास्ति प्रमाणाभावा
दिति चेत् कालकपालान्यानुपनिर्वृट्टप्रागभावः कश्चिद्द्रव्यानाधाराधाराधारकश्चिद्द्रव्यानधिकरणवृत्तिर्वाच्यमानत्वात्स्काशाद्वस्तौ भ्रा
भाववदिति वृत्तमलपसाधनात् । एवमेव च घटध्वंसपक्षीकरणागामिप्रलयसाधनं यद्वा घटः कार्यद्रव्यानाधिकरणवृत्तिध्वंसप्रतियोगी
कार्यत्वात् न शब्दवत् कार्यद्रव्यत्वकार्यद्रव्यानधिकरणकार्याधिकरणवृत्तिध्वंसप्रतियोगिवृत्तियोगिवृत्तिकार्यमात्रवृत्तिधर्मत्वावच्छेद
त्ववत् । पक्षः एककालीनाः सर्वपरमाणवः समस्तोपादेयध्वंसध्वंस्याः । आरम्भकत्वात् नष्टपवनारम्भकपरमाणुवत् न सर्वत्रैव पक्ष्य
मावच्छेदकावच्छिन्नसाध्यप्रतीयते इति एककाले सर्वस्य नाल्प्यते । न च पवनपरमाणूनामपि पक्षत्वेनांशतः सिद्धसाधनात् पक्षधर्मता
वलल्लभ्यसाध्यप्रतीतेः । अभेदानुमानवत् पक्षस्य दृष्टान्तत्वाविरोधः यद्वा परमाणवः कार्यद्रव्यानधिकरणवृत्तिकार्यवन्तः नित्यस्व
त्वादाकाशवत् भूगोलकसंतानेयं भूगोलकसंतानानधिकरणवृत्तिध्वंसप्रतियोगी कार्यत्वात् घटवत् एतत्कर्मातिरिक्तानि कर्माणीस
निबंधकप्रतिबध्यानि कर्मत्वात् एतत्कर्मवत् न च नान्त्यव्यभिचाराशंका सर्वेषामेवरूपत्वान्न्य न च भावे च स्वभावपक्षत्वात् न स्वसंध्यानि च मी
पितिप्रमानतापेक्षायामनवस्थितेः आगमोप्यमुमर्थं संवदतीति कृतं प्रसक्तानुप्रसक्त्या ।। आचारमूलत्वं वेदस्य प्रवर्तकज्ञानकत्वेन

वि॰ श॰ भवतीति प्रवर्त्तकज्ञानं निरूप्यते। तत्राभिधास्यमानस्यापूर्वभावनाज्ञानं न प्रवर्त्तकं तस्मिन्सत्यप्यप्रवृत्तेः असत्यपि प्रवृत्तेश्च। कार्यत्वज्ञा

२७ नं प्रवर्त्तकमिति गुरवः। तन्न। तथा हि। ज्ञानस्य कृतौ जनकतायां चिकीर्षातिरिक्ते न कर्त्तव्यमस्ति। तत्सत्त्वे कृतिविलम्बे हि त्वरणाभावात्। चिकी

र्षा च कृतिसाध्यत्वप्रकारिका कृतिसाध्यक्रियाविषयेच्छा। पाकं कृत्या साधयामीति तदनुभवात्। सा च स्वकृतिसाध्यताज्ञानसाध्या। इच्छा

याः स्वप्रकारकधीसाध्यत्वनियमात्। अत एव स्वकृतिसाध्ये पाके प्रवर्त्तते न त्विष्टसाधनताज्ञानसाध्या। स्वकृतिसाध्यचिकीर्षायत्वे। स्व

कृतिसाध्यताज्ञानं प्रतिबन्धकमिति चेन्न। तदभावस्य कारणत्वे गौरवात्। अन्यथाभावेऽप्यसिद्धेः कृतिसाध्यताधीरसिद्धेष्टतो न लोधवा

वसर इति चेन्न। यत्र शब्दस्तु मानाद्यादेवात्मानं तल्लाघवावतारात्। इच्छायाः स्वप्रकारकज्ञानसाध्यत्वनियमेन कृतिसाध्यत्वज्ञानस्यावश्य

कत्वात् जनकज्ञाने विघटयत एव ज्ञानस्य प्रतिबन्धकत्वाच्च। व्याप्तिज्ञानं विघटनद्वारा अनुमितिप्रतिबन्धकानैकान्तज्ञानवदन्यथा।

स्वकृतिसाध्यत्वानिष्टसाधनत्वोपेक्षणीयत्वानि फलत्वज्ञानप्रतिबन्धकानैकान्तज्ञानवदन्यथा स्वकृतिसाध्यत्वानिष्टसाधनतो

पेक्षणीयत्वानि फलत्वज्ञानं प्रतिबन्धके किं प्राज्ञानमेव प्रवर्त्तकं कल्प्येत। ननु सन्तोषात्त्वर्थगोचरेच्छावावित्वाद्याघवाच्च कृताविच्छाग राम॰

चिकीर्षा साचेहस्याविवेष्टसाधनताज्ञानादिति चेत्। न। वह्निनासाधयामीतिवन्न कृत्या साधयामीतीच्छापाः कृतिरूपं विमलभूयमा २७

नापाः सननवाच्यत्वेन गौरवेणावच्छेदकत्वस्याख्यातुमशक्यत्वात् किंच पाकं चिकीर्षतीत्यत्र प्राधान्येन पाकस्येच्छाविषयत्वमनुभूयते न तु सुख
नो धातोश्च सन्प्रत्ययाभिधेयेच्छाप्रकारत्वाच्चेति ओदनं बुभुक्षुरित्यत्र भोजनविशेष्यतयौदनस्येच्छाविषयत्वात्प्रधानेष्टसाधनत्वेनेष्ट
त्वाविवक्षणाविच्छासंभवेपि कृतीच्छा न प्रवर्तिका किंतु कृतिसाध्येच्छैव घटं जानाति चिकीर्षति करोतीति ज्ञानचिकीर्षाप्रवृत्तीनामेकविष
यकानुभवात्। अथ परिकृसा साधयितुमिच्छा सा न तदा चिकीर्षितस्य पाकस्यान्यत्र सिद्धे सा नापगच्छेत् न स्वव्यापारविशेषसाध्यत्वेनेच्छाया
पातराधीनफललाभेन निवर्तते प्रीसाधनलाभेपि प्रतिग्रहेणान लिप्साया अनिवृत्तेरिति चेन्न स्वविषयासिद्धत्वस्य फलेच्छाविच्छेद
स्य चोपायेच्छाविरोधित्वात् अस्ति च तथा कौदनयोः सिद्धत्वं अस्यो न च्छायायाः पाकचिकीर्षाभावस्येव प्रस्तुतासिद्धत्वात् कृतावेवेच्छा न वि
च्छिद्येत यदि कृतिविषयासिद्धत्वफलेच्छाविच्छेदो न विरोधिनो। प्रीसाधनलाभेपि तदधिकधनेच्छा न विच्छिद्यते तस्या असिद्धत्वात् तत्कृतेच्छा
याश्च सत्वात् धनमात्रार्थिनश्च प्रीसाधनलाभे प्रतिग्रहणाज्जाच्छिभान्नास्येव धनमात्रस्य सिद्धत्वात् किंचिद्विशेष्यसिद्धेरेव हि सामान्येच्छा
विच्छेदः अन्यथा सकलस्वविषयसिद्धेरसंभवेन तदुच्छेदो न स्यादेव। वस्तुतस्तु क्रियानुकूला कृतिरिष्टोपायस्तेन क्रियायाः कृति
साध्यत्वमिष्टोपायत्वं च भातः क्रियाहार्थेवकृतेरिष्टसाधनत्वादिति न दोषः धातुकृताविवक्षेतिसाध्यतेन क्रियायामपि सैवेच्छेति चिकी

र्षायां कृतिसाध्यत्वप्रकारनैवसंभ्रातः कृतौसमानविषयचिकीर्षत्वेन चिकीर्षायाः कृतिकारणत्वं ननु कृतीच्छात्वेनाभिन्नविषयत्

चि·श· यातथागौरवात् न चापि येन रूपेणयस्येष्टसाधनत्वं तेन प्रकारेण तत्रेच्छा यथा स्वकेदारत्नाष्टित्वेनेष्टसाधनत्वाज्ज्ञ थेवेच्छा न तथा च कृति

साध्यत्वेन पाकस्येष्टसाधनत्वज्ञानेऽप्यतः कृतिसाध्यत्वेन तत्रेच्छा भवतीति कृतौ कृतिविषयेवा चिकीर्षायां नष्टीच्छावित्तरूणां सामग्र्य

न्तरकनत्यन्तमिति चेन्नभवेदैतदेवं यदि कृतिसाध्यत्वेनपाकस्योदनसाधनत्वंस्यात् नैवैवं गौरवात् किंतु पाकत्वेन सत्तु कृतिविना

२८ नेसम्यदेतन्नवह्निनासाधयामीतिवत्कृत्यासाधयामीतीच्छाइष्टसाधनताज्ञानादेवेति चेन्न हि तत्र वह्निसाध्यताज्ञानवदत्रापि कृति

साध्यत्वज्ञानं कारणमावश्यकं कृतौ यानुमवृत्तिसिद्धं चिकीर्षाधीनत्वं विशेषः तेनप्रणापचकं सचौरेजीवनयोनि कृतिसाध्येन प्रवृत्तिः

अन्यथा कृतिसाध्येष्टसाधनतायत्रेपि तत्र प्रवर्त्तेत नतु चिकीर्षाधीनत्वस्योपलक्षणत्वे उपलक्ष्यसमानुगतत्वानतिप्रसक्तधर्माभावात्

कृतिमात्रस्य चातिप्रसंगात्तत्तत्कृतिविशेषाठपलक्ष्याः तथा च तदननुगमात्स्वरूपसननुगमविशेषणत्वे चिकीर्षायांप्रवृत्तौ च चिकीर्षा

त्वानकारणत्वगौरवे प्रमाणाभावश्च किंच चिकीर्षासाध्यावस्यापाः कृतेः सिद्धावस्यासाधनत्वविरोधेन कृतिसाध्यतायाकारणत्वाज्ञा राम

पनेतिचेत् अस्तिहि कृतौ विशेषोमानसप्रत्यक्षसिद्धो जीवनयोनिपत्नयात्नत्रचिकीर्षोपलक्ष्यः पत्नविकीर्षाकारणत्वयहेसच तत्र २८

जातिरूपो ममत्वननुगतकारणोपाधिरूपः। एवं च चिकीर्षाधीनत्वेनानुगतेन कृतिविशेषाणामुपलक्षणाणामनुगतत्वमपि। तथा चिकी
र्षापि। एवं जीवनयोनिप्रयत्नव्यावृत्तकृतिविशेषाणां कृतित्वेन ज्ञानेन कारणमिति नाननुगमः। ननु कृतिसाध्ये कृतित्वे विशेषणे ऽसत्वान्
सत्वे वा कृतौ तस्या ज्ञाने च कृतित्वेनान्याश्रयः नो यत्नत्वेन ग्रहणमतिप्रसंगादिति चेन्न। कृतिर्हि ज्ञानविषयतया विशेषणमेव साध्येव परिचाय
कतयोपलक्षणं। अन्यथेष्टसाधनेपीष्टविशेषणसाध्याधीनकृतिसाध्यत्वात्। अत एव मलभोजनादिक्रियासाध्यानन्तु नन्न कृतिसाध्यो:। चि
+ मसत्वात्तेनोपलक्षणमतिप्रसंगात्। लिंगज्ञानादेवाकांगतिः नन्वेवमपि मेपप्रवृत्तिश्चिकीर्षास्यात् तस्यापि चिकी+ कीर्षितत्वात् कृतेः।
स्वधर्मसाध्यकारातिरिक्ते चिकीर्षाविष+यमात्रेजनकत्वात्। नहि भोजनं चिकीर्षाधीनकृत्यागमेन साध्यमइति केचित्। तन्न गुरुतरभारो
त्तोलने कृसाध्येऽप्यमात्यवृत्तस्य निगडनिश्चलदेहस्य वा कृत्तो स साधुवोलनवलनशरीरक्रियानुत्पादेपि श्रमानुभवात् कृतेरेव कारणत्वा
त्तत्तुनजन्यक्रियायाः। सुखेच्छाभिचाराच्चानाहि सुखकृतिकारणचिकीर्षाविषयः उपायचिकीर्षाजन्या हि कृतिर्न तु सुखचिकीर्षाज
न्या चिकीर्षाधीनकृतिसाध्यत्वं भ्रमे। द्वेषपोनियतादपि तदुत्पत्तेरिसपरीतत्र। शत्रुवधस्यापि साधनत्वेन चिकीर्षाजन्या कृतिसाध्यत्वात्
द्वेषस्य पवनाजनकत्वात्। द्वेषसिद्धिस्तु शत्रुफलीत्वमेववलात्। पतनुभ्रमः। कृतित्वेन कृतिसाध्यानन्तु चिकीर्षाधीनकृतित्वेयद्य चिकी

र्षितेपि श्रमेविकीर्षाधीनकृतित्वेन कारणतास्यात्तदा चिकीर्षितमेव भोजनं कुर्यात् साध्यत्वेनाचिकीर्षितं गमनादीतिमस्यात् श्रमवद्गम
चि॰श॰ णेपितत्तुल्यत्वप्रसंगात्। भोजनादिष्वविकीर्षाधीनकृतित्वविशेषणात् सहितकृतिमात्रंत्वभिवरति जीवनयोनिकृतेस्तद्वत्त्वाद्गत्। यद्य
श्रमोनभोजनकृतिसाध्यः किंतु नत्रिरन्तरोत्पन्नात् जीवनयोनियत्नादेवेति। तन्न। नहि कृतित्वेनाच्छूपजनकत्वं नापि कृत्यन्तरादेव श्रमोऽस्
२९ ति। जीवनयोनियत्नेसत्यपिमारोद्वहनादिकमकुर्वतस्तादृशश्रमाननुभवेन तस्य श्रमाजनकत्वात्। तस्माद्भोजनादिवच्छ्रमविशेषाणाम
पि भोजनादिकृतिसाध्यत्वमनन्यगतिकत्वात्। स्वस्यस्वेष्टयत्नुगमिन्तु श्रमस्तज्जन्यइतिचेत्। न। स्वदारेश्रमान्यहेतुकत्वात्। अन्यथाहेतु
कत्वात्। अन्यथाभ्यागारेपितद्वत्तु चेन्नौ श्रमानुवृत्तिप्रसंगादिति मैव। स्वेच्छाधीनत्वस्य कृतिविशेषणत्वात्। श्रमश्चनियमतोमेच्छाधीनकृ
तिसाध्य इति नतादृशकृतिसाध्यः श्रमेदुःखत्वेनेच्छाविरहात्। अतएवान्येच्छाजन्यकृतिसाध्यत्वेन श्रमोनानरोपकइत्युच्यते। स विकीर्षाधीन
त्वं तु न कृतौ विशेषणं गौरवात्। अन्येतु कृतिगतधर्माणामेवोद्देश्यत्वात्तद्धि शिष्टकृतिसाध्यश्च न श्रमोऽचिकीर्षितत्वात्। किंतु कृतिमात्रसा
ध्यः। अतएव कष्टकर्मेस न तु भवेऽहोकाना। एवं विकीर्षायामेकैककृतिसाध्यत्वप्रयोजकत्वेवनुकृतिसाध्यत्वे सतीष्टसाधनत्वं सुखत्वदुः रामः
खाभावत्वं च तिचतुष्टयस्कुप्रयोजकत्वं मम सुखत्वदुःखाभावत्वचतुष्टय। इष्टिसाध्ये सुखेहीच्छा हृष्टिमपि विषयीकरोतीति नत्विष्टसाधनत्वे

ननचेष्टा।साधनत्वस्येच्छाविधेयत्वात्।तद्वदत्रापि।विषभक्षणेकृतिसाध्यत्वेपिबलवदनिष्टसाधनचिकिर्षानास्तीतिकृतौचिकीर्षा
जन्यत्वंविशेषणमितिकाश्चित्।तन्तुच्छं।एवंहिविषभक्षणंकृतिसाध्यमेवनस्यात्जीवनयोनिकृतेस्तस्यानुत्पत्तेरितिविध्यर्थेविशेषणं
स्यादेतत्।इष्टसाधनताभ्रमाद्विषभक्षणेवैसवद्धनेवचिकीर्षाजन्यकृतिसाध्यत्वमस्तीज्ञानत्वप्रयुक्तत्वात्कार्यत्वस्य।तथाचसंज्ञा
नबाधोपितत्कार्यत्वज्ञानाप्रवर्तनेनतथात्मोपिभोजेने।ननुकृतिसाध्यतानुभवस्तथाप्यमर्थेष्टसाधनतास्मरणेपिप्रवर्तेत।नचेष्टसाध
नताज्ञानंचेदोवानुमापकमस्तीतिचेन्न।वस्तुतस्तत्रकृतिसाध्यत्वलिंगांतरेणप्रवाकेनवातदनुभवसंभवात्।लिंगाभासाच्छब्दाभासाद्वाप्र
प्रवृत्तिप्रसंगाच्च।भेदाग्रहवादिनस्तत्रतदनुभवाभावात्।मैवं।स्वविशेषणावत्ताप्रतिसंधानजन्यंहिकार्यताज्ञानंप्रवर्तकं।तथाहिकाम्येपु
रुषविशेषणकामनानंतरं:कामासाधनताज्ञानेनयागरूपाकार्येकार्यताज्ञानंनित्येचकालशौचादिस्वविशेषणे।तथाचएतत्संध्यायामहं
कृतिसाध्यावंदनकः संध्यासामयसंध्याधिकारित्वात्पूर्वसंध्यायामहमिवेतिकार्यताज्ञानंशौचादिस्वविशेषणप्रतिसंधानजन्यंतदुक्तंकार्य
विशेषः पुरुषविशेषणावगतः प्रवृत्तिहेतुरिति।तेनज्ञानबाधस्यविषभक्षणेवैसवंदनेच भ्रमदशायामिनिष्टसाधनताज्ञानमस्तीतिपेनतज्जन्य

कार्यताज्ञानात्प्रवर्त्तेतान्तरस्य च तत्सौकामनाविरहेणाप्यसाधनत्वज्ञानाभावात्तथाबोधः। अन्यो त्वात्ममोऽडीगिलपतिसधनत्व अप्यभे
चि·श· कृतिसाध्यताज्ञानं संभवतीति जीवनव्यतिरिक्तस्वविशेषणमिति तन्न। अमेवेच्छाधीनकृतिसाध्यताभावात्। इष्टसाधनत्वालिंगकका
र्यताज्ञानं प्रवर्त्तकमिति परो तन्न। निमेतदभावात् ननु विषभक्षणस्याहृत्तमिष्टसाधनत्वमेव कृतिसाध्यताज्ञाने विषयतया विशेषणमस्तु।
३० स्वविशेषणावत्ताज्ञानजन्यत्वापेक्षया लघुत्वात्। किं चोपायविषया चिकीर्षा इष्टसाधनताज्ञानसाध्या उपायेच्छात्वात् तृप्तीच्छावत्। भोगचिकी
र्षायां तदभावादप्रयोजकमिष्टसाधनत्वमिति चेत्। न तथापि स्वविशेषणाधीनजन्यत्वाभावेन तत्तत्स्याप्रयोजकत्वात् कृतित्ववैचिकीर्षायां तत्प्र
योजकत्वेन च भोगचिकीर्षा तथा गुपायचिकीर्षात एव कृतिसंभवादिति चेत् तुल्यमिति मेव। साध्यत्वसाधनत्वग्रहनं चैकमेकं नेकदासि
द्धमसिद्धं चेति ज्ञायते। न च स्वरूपगतता साध्यत्वसाधनत्वयोरतो न विरोधस्तावाच्यं। परिहितस्वरूपनिवेशनमुभयं तदानुत्स्वरूपसदेवसिद्धम
सिद्धं च स्यात्। भिन्ननिरूपितत्वेपि तयोः सिद्धत्वासिद्धत्वे अनन्यगम्याज्ञानात्। तस्मात्समयभेदोपाधिक एव तदुभयसंबंधः। पाकस्तदानीं साध्य
त्वमये च साधनत्वे ज्ञापयत इति चेत्। नेदानीं मग्रिमपदार्थयोगाति। तादृनन्तुगमेन व्याप्यग्रहात्। शक्ते न तथा प्रतिपादयितुमशक्यत्वात् गो

रत्वाच्च। न च कृतित्वेन सिद्धमिष्टसाधनमिति ज्ञानाच्चिकीर्षा न हि सिद्धे कश्चिच्चिकीर्षति। कृतेः पूर्वं कृतितः सिद्धमिति ज्ञानाभा
वाच्च। न च कृतिसाध्यत्वेन पाकादेरिष्टसाधनत्वात्साधनत्वमपि साध्यं न हि कृतिसाध्यत्वेन पाकस्यौदनसाधनत्वमुक्तं। तस्मात्कृ
न क्रियमाणाद्विलक्षणाकृत्यनंतरभविष्यज्जातस्वकृतिसाध्यत्वं चिकीर्षाप्रयोजकं। तादृशत्वसाधनत्वविरोध एवा किं च साधनत्वस
सिद्धमात्रधर्मत्वात्साधनत्वज्ञानमिच्छाविरोधि नहि कश्चित्सिद्धमिच्छतीत्युक्तं। एतेन तृष्णादाविष्टसाधनताज्ञानमुपायेच्छाकरण
त्वेन क्लृप्तमिति निरस्तं। कथमन्यथा दुःखजनोऽस्तु द्वेष्यस्य हा विच्छा न त्वसाध्यत्वज्ञानादिति गृहीणा अमे तु सुखदुःखाभाववत्साधनेऽपीच्छाप्र
योजकमनुगतमुद्देश्यत्वपुरुषार्थपदवेदनीयधर्मान्तरमस्ति॥ अनुगतकार्यस्यानुगतकारणनियम्यत्वात्। तदेव दुःखतत्साधनव्या
वृत्तेस्सुखतत्साधनादौ चिकीर्षाप्रयोजकमिति। न च दुःखविरोधित्वमेव तथास्त्विति वाच्यं सुखज्ञानवत्सुखानियम्यविरोधस्यासंभवात्
। व्यधिष्ठानकभावस्यैकसमयसामानाधिकरण्याभावस्य च फलादिसाधारणादिति। तदज्ञानेऽपि सुखत्वज्ञानादिच्छोत्पत्तेः। न हि सुख
त्वेन ज्ञाते धर्मान्तरज्ञानं विना नेच्छा तथात्वसुखत्वं प्रयोजकत्वमहाव्यापत्तेः। तदेव हि स्वतः प्रयोजनपदगम्यसत्त्वहानितपेक्षतो किंचानुग

वि॰ श॰ न धर्मकल्पनापि कारणेन च सुखादीच्छाकारणमनागतत्वात् किंन्तु तदवगमः तर्हि सुखादिज्ञानेन तत्स्वरूपसदेवेच्छाप्रयोजकमस्त्वि
ति चेन्न । न यथार्हेष्टपन्नसुखादिज्ञानादिष्टसंघतेऽन्यतरत्वान्तरणारणिमणिन्यायाद्गुनयेद्धेवज्ञायतां कृतिसाध्यत्वबत्कृतौ समा
३१ मग्निमन्थनरूपो स्वरूपेण कृतिं विना योगक्षेमसाधारणैवेति न । कृतिसाध्यत्वं च न कृतेः एवं । ननु कृतौ निष्ठापास्त्वपि धर्मीनकार्यः तथा
च कथं कार्यं पूर्वकामिनो व्ययः कारणीकत्वे न क्रियातुल्यत्वात् । तत्र प्रवृत्तिकाम्यसाधनत्वं न तु कार्यताबुद्धेः प्रयोजकत्वात् । तत्र
कार्यताविशिष्टस्यकाम्यसाधनत्वेति व्याप्तिः । ननु पाकादेः कृतिसाध्यताम प्रत्यक्षेण कस्मनंतरं पाके सति कृतिसाध्यताज्ञाने तस्मि
म्या न्कृतिरिति तत्र्याप्तिःपात् । कृतिसाध्यतोत्तीर्णे च विकल्पेकसोऽसंभवाच्चेति चेन्न । नापाकामत्कृतिसाध्यामत्कृतिं विनाऽसत्वे सति मदि
ष्टसाधनत्वात् देवाधनधीनत्वे सति मदिष्टसाधनत्वाद्दूमाभ्योजनवदित्यनुमानात् कृतिसाध्यताज्ञाने यस्य यदिष्टसाधनं यत्कृ
तिं विना परान्नासिध्यति तत्तदाकृतिसाध्यमिति व्याप्तेः असिद्धस्येष्टसाधनत्वाभावात् वलवदनिष्टाजनकत्वं च लिंगविशेष राम॰
णेन मधुविषसंपृक्तान्नभोजनेन व्यभिचारः । अतीतपाके कृतिसाध्यतोत्तीर्णे च न व्यभिचारः सामान्यतः नस्यापि कृतिसाध्य ३१

त्वात् अतीतनतादृशापांचातीतोदने इच्छाविरहेणेष्टसाधनताऽभावात्। अत एव निपदोपघट्टनदेहो घर्षति वारि हेतोपहृतो। तोपला
भस्मंभावनायां वासरोवगाहेनेन प्रवर्त्ततेऽरुच संतापशान्तिसाधनस्य तोयस्य वधस्य स्वकृतिं विनापि सिद्धप्रतिसंधाने लिंगाभावेन स्व
कृतिसाध्यत्वज्ञानाभावात्। परो च सत्कृतिं विना न संभवतीति प्रतिसंधत्ते न तरां प्रवर्त्तते तोयस्य संतापशान्तिमात्रमिष्टं सरोवगाहनस्ये
ष्टसाधनत्वमेव न प्रतिसंधत्ते उपस्थित इष्टोपि न तस्य वशिनिकस्थितानन्न। नोपसर्वबलत्वेन संतापशान्तिसाधनत्वात्तस्य च सरो
वगाहनेपि सत्वात्। अन्यथा वृष्टिरपि तत्साधनं न स्यात् सरोवगाहनादपि तत्सिद्धेः कार्यसाधनत्वं च कृतिसाध्यत्वेन लिंगपाकादिव
दोरकादावपि प्रवृत्तेः इष्टकृतिसाध्यत्वज्ञाने हेत्वभावात्। नन्वेवं लिंगज्ञानमेव प्रवर्त्तकमस्तु प्राथमिकत्वादावश्यकत्वाच्च। न च ला
घवात्कृतिसाध्यत्वज्ञाने तथा कृतिसाध्यत्वानुमितौ न तदुमानाभावेन युगपदुपस्थित्यभावात् प्रवृत्तिसामग्र्यानुमितिप्रतिबंधाच्चेति
चेन्न। लिंगज्ञाने कृतिसाध्यत्वांशप्रकारेण तत्प्रकारकचिकीर्षापातस्यापि हेतुत्वात्। अत एव लिंगान्तरज्ञानमपि न प्रवर्त्तकं। न हि पाकादि
कृतः क्रियमाणो वा न परस्तु न तस्य कृतिसाध्यत्वे बाधात्। नाप्यनागतः अभविष्यत्वे मानाभावेनाश्रयासिद्धेः पाकत्वमविष्यत्वकृतिसा
ध्यत्वाद्यप्यत्र व्याप्तिमानमितिवेन्न। मानाभावे नगोत्वेपि तस्याप्रसिद्धेः। पाकमात्रपक्षक इति चेन्न। मात्रार्थोपरि पाकत्वेन तदाबाधो

चि॰शा॰ लिंगासिद्धिश्च सर्वपाकपरत्वे च तस्य सिद्धभागे बाधोऽनागतभागवाश्रयासिद्धिः वर्त्तमानाबुदासीनः पाकपक्षः पाकसामान्यं च कृति
साध्यत्वेनाधिगतमिच्छापि न सिद्धस्य पक्षत्वेनासिद्धस्येत्सत्वनुमितेः सिद्धो विषयत्वे बाधात् । भिन्नविषयत्वे चासिद्धविषयेच्छाप्रवृत्त्याद्यनुसा
३२ दकत्वाच्च । कृतौ क्रियमानसाधारणाकृतिसाध्यत्वज्ञानादेवासिद्धचिकीर्षाकृतिश्चोत्पद्यतेऽनन्यगतिकत्वेन तथाकारणस्वभाव
कल्पनादिति चेन्न तर्हि तादृशकृतिसाध्यत्वे चिकीर्षायाः प्रकारस्तादृशज्ञानेनास्तीत्यप्रकारकज्ञानादेव चिकीर्षा स्यात् तथा चलि
गज्ञानमव प्रवृत्तिहेतुरक्तप्राथमिकत्वात् । यत्त्वस्मिन्पाके कृतिसाध्यत्वासंसर्गाग्रहात्प्रवृत्तिः स चासंसर्गाग्रहस्तद्बलसाधकज्ञानादि
ति । तन्न । एतत्पाकस्यासिद्धत्वेन तत्र कार्यत्वासंसर्गाग्रहेतुमानवाधात् एतत्पाकस्यासिद्धत्वं तदानगतस्यैतदिति च वाच्यं हि एतत्पाके
स्यासिद्धत्वेन तत्र कार्यत्वासंसर्गाग्रहे ॐ ज्ञानार्थी पाकेन प्रवर्तेत सिद्धोदनोऽपि पाकेन शोऽपि भोजने प्रवर्त्तेनानन्तपाकादौ सिद्धत्वग्रह
तेऽसंसर्गाग्रह इति चेन्न तुल्यं । अपि च । एतत्पाके कार्यत्वासंसर्गाग्रहात् विद्यमानासंसर्गाग्रहाद्धि सर्वादिनी प्रवृत्तिः स्यात् । किं चैवं सि
द्धपाकज्ञानादेतात । सिद्धे पाके इच्छाप्रवृत्ती स्यातामिति ।। अत्र क्रमः । पाके कृतिसाध्यत्वसिध्यत्वासिद्धेर्बाधादनागतपाकमादाय सिध्य राम
तिपक्षतावच्छेदकधर्मसामानाधिकरण्येन साध्यमानस्य लिंगेन सिध्यतीत्यनुमानेऽक्षतत्वात् । यथा प्रसिद्धवह्निबाधेऽपि वह्निमात्रेण ३२

बाधितमित्यप्रसिद्धापि वन्हिः सिध्यति। तथाप्रसिद्ध्या केकृतिसाध्यत्वबाधेपि पाकमात्रेन बाधितमित्यप्रसिद्धपाकमादायतत्सि
ध्यति। अप्रसिद्धयोः पक्षसाध्ययोः सिद्धावविशेषात्। तस्मात्सिद्धस्य कचित्। अप्रसिद्धस्य वासिद्धेसिद्धत्वेनाबुमानविधा। अन्यथाकृ
तिसाध्येष्टसाधनता पक्षेपि पाकादौ कृतिसाध्यत्वकमप्यवगम्येत किं च न वा पीष्टसाधनताज्ञानात्कथं तृष्णादाविच्छा। सिद्धत्वस्येच्छाविरोधि
तदन्वितत्वेनोपस्थितस्यनोपवापाकांक्षेतिस्वतंत्रकपालोपस्थितयेविधानलक्षणा।नचव्युत्पत्तिविरोधः।नहिलोकेक्रियाकार्यत्वेशक्तिर
वधारितायेनविरोधोभवेत्।किंतुकार्यत्वमात्रेक्रियायाधातुलभ्यत्वात्।नवधर्म्यंतरेशक्तावपितन्मंगः।तस्मात्स्वकसंबंधितस्वार्थबोधक
त्वप्रत्ययानगृहीतंप्रत्ययार्थश्चापूर्वमपीतिनविरोधः।अतएवालोकेलिङ॰क्रियाकार्यत्वेशक्तिस्तथापितन्मंगंविनैवनानार्थत्वाये
नवेदधर्म्यंतरेशक्तिः।तांविनास्वर्गकामान्वयासंभवात्।अन्येतुपचेतेत्यादौधातुनैवपाकःकार्योभिधीयतेलिङ॰तत्तत्तात्पर्यग्राहिकान रा॰म॰
शक्त्याग्रहात्व्युत्पत्तिविरोधइति।तदसत्।लिङःकार्यत्वेअशक्तौपचतिपदात्कार्यत्वज्ञानानुपपत्तेः।फगोपद्धतिद्वयविरोधात्।न ४८

चाउहत्वाथोउभयसाधारणस्यानुपास्थितेरिति दिक्। पदज्ञानेयदानां शक्तिः शक्यत्वात्। एवं च लिङ्पदमेकत्वोच्चारणोस्या
पित्वस्वर्गजनकत्वकार्यत्वानां ज्ञाने शक्तमिति व्युत्पत्तिः स्यापितानादिके चोपस्थितमेव। ततो लिङ्पदेनैकत्वोच्चारणोपोपस्थितादिव
शाद्याग विषयं क्रियते। न चैवं नानार्थवदेकैकज्ञाने शक्तिग्रहादेकैकविषयोनुभवो भवेन्न तु समुदितविषय इति वाच्यं शक्तिग्रहकाले एक
त्वोच्चारणादिति विशेषणानं हि ज्ञातत्वाभवात्। नानार्थे तु प्रामाण्याभावेन गौरवेण च शक्तिग्रहे तस्याप्रवेशात्। तथाप्येतेषां समन्हावनस्या
त्वेनुपरस्परं वैशिष्ट्यज्ञानमिति चेत्। न। साकांक्षधर्मधर्मिगोचरैकज्ञानस्यैव विशिष्टज्ञानत्वात्। न च समन्हालवन सभेदः। तस्यानाकांक्ष
विषयत्वात्। अस्तु वा यस्मितेष्यगृहीतासंसर्गकस्यापि त्वस्वर्गजनकत्वकार्यत्वेषु शक्तिः। अगृहीतासंसर्गस्यापि विशिष्टज्ञानसमान
शीलत्वात्। अत उक्तमाये न तावद्विषयकमेकं ज्ञानं लिङ्पदेन जन्यते। एवमेव लौकिकार्थेषु स्वर्गादिपदेषु शक्तिग्रहः। ननु भ
वदुक्तप्रकारेण शक्तिग्रहः। ननु भवदुक्तप्रकारेण शक्तिग्रहः तथापि लिङ्पदार्थाणां विषयककार्यानुभवे सत्यपद्बहला भात्स्वर्गका
मान्वयः संभवति। मुपयादकप्रतिसंधाने प्रसिद्धार्थस्वर्गकामपदसमभिव्याहारमन्यथानुपपत्त्या लिङः कार्ये शक्तिकल्पनं। नहि
अथमनुपपादकप्रतिसंधानेविनार्थापत्तिः संभवति। न च शक्तिकल्पनात् पूर्वं मुपपादकशक्तिरनिविष्टमपूर्वं ज्ञातमिति चेत्।

शं०चिं० तत्किंपुनरेवविशेषणउपपादकः पक्षधर्मतावलात्सिध्यतीतिसंधानमर्थापत्तौकल्प्यं तथात्वेप्रर्वृग्रहीतमात्रमात्रस्यकल्पत्वेक
४९ ल्पपूर्वगृहीतमात्रेनोच्छेदापत्तिः तस्माद्यथासामान्यतोभोजनस्यपीनत्वसंबंधाद्यगमात्तउपपादकतेकल्पतिकल्पनाततोविशे
षावगमः। यथावासामान्यशतत्वमतिवाचकपदेनशमभिव्याहारवशाद्विशेषाभिधानमेवमत्रापिकार्यमात्रवाचकत्वेविशेषलाभः
संभवतीतितर्द्धितोपपादकप्रतिसंधानाद्वस्त्वर्थापत्त्याशक्तिकल्पनं। पार्गावषयकंचकार्यनघटादितस्यसविषयकत्वाभावात्। वि
षयत्वेवतानघटयोरिवस्वभावसंभवंधोवातन्निरूपणाधीननिरूपणत्वंवातत्समानसंवेद्यत्वंवाआद्यत्वसाधनत्ववा। अस्तिहिगदानहो
माजन्यापूर्वांशानुस्यरूपसाधनांतरव्यवच्छेदेनप्रत्येकमात्रजन्यत्व॥ ॥तदुक्तं॥ ॥विशेषोहिविशेषार्थःसिनोतिर्वध्यउच्यतेविशेषेणासि
नोतीतिविषयोतोनियामकइति॥ ननुपनन्तृपेणाशक्तिग्रहस्तेनकार्यत्वशक्तास्निंउ-पदाल्लसगायाकार्योपस्थितौयोग्यतादिवशात्पूर्व
लाभोस्तकार्यस्मरणास्यवितामिधानोपयोगिनत्वपूर्वस्मरणांतत्त्वपदेनपदार्थनेवेतिनकश्चिद्विशेषः कार्यचशक्यकार्यत्वसंबंधित
पावगतमितिचेत्। नलिङोलाघागीकत्वेनापवानानुभावकत्वात्। नचेतरान्वितस्वार्थशक्तस्यपउआदिपदस्येतरदपूर्वसारायानुभाव राम०
कत्वमितिवाच्यं॥ इतरोपलक्षि[redacted]तस्वार्थान्वयामात्रेहियदानांशक्तिरशक्तिनेत्वितरत्रगौरवात्। पदांतरल ४९

न्यत्वाच्चलक्षणायांचतीरोपलक्षितान्वयशालिस्वार्थानुभावकत्वमितरपदस्यतीरस्यानेनतुसंस्कारादुपस्थितिः।असतिहितेनान्विताभिधा
नाभावात्।नचापूर्वसंस्कारविषयः।किंचयजिपदेनस्वर्गकामकार्यविषयोयागइत्यनुभवोभवेत्।लक्षणायामितरस्यस्वलक्षणीयविशेष
णकस्वार्थविशेष्यकानुभवजनकत्वात्।नचैतादृशोबोधआकांक्षितः।नचयागविशेषितकार्यमात्रेणस्वर्गकामान्वयःप्रतीयतेकिंतुयाग
विषयककार्यविशेषेणतथाचतथाविधबोधार्थलिङःकार्यशक्तिरेवेति॥अत्रोच्यते॥अन्वयप्रयोजकरूपवत्वंयोग्यता।अनाप्तोक्तेरपसा
सिंचतीत्यत्रसत्यप्ययोग्यत्वप्रयोजकद्रवद्रव्यत्वेबाधकप्रमायामन्वयाबोधात्।अयोग्यत्वेपिस्वबाधकप्रमाविरहःकारणंतर्हिसोप्यवश्यापे
क्षणीयइतिलाघवात्सैवयोग्यता।एवंचतद्वत्त्वयोग्यमयोग्यंचेतिस्यादितिचेत्।सत्यं॥यथादृशाविशेषितेद्वसमाकांक्षमनाकांक्षमासन्नमनास
न्नमनासन्नंचतथास्वबाधकप्रमातद्विरहदशायांतद्वत्त्वबोधेयोग्यमयोग्यंचाभिधीयतेस्वबाधकप्रमायांतद्विरहेवायोग्ययोग्यताव्यवहार
दर्शनात्।स्वबाधकप्रमाविरहदशायांयोग्यतादिसत्त्वेपिवह्निनासिंचतीत्यत्रान्वयबोधोप्रमादोषवस्तुरूपप्रतीतत्वात्।सामान्यभानस्यक्व
चिद्विशेषभाननियतत्वाद्विशेषाभानेकथंतद्भासतइतिचेत्।वस्तुगत्यापरंपरासाधनंविशेषोभासततएवपरंपरासाधनत्वस्तुप्रकारेणभास
तेतत्प्रकारभानेपरंपराघटकत्वानपेक्षत्वात्यथाघटेनजलमाहरेत्यत्रयोग्यतयाछिद्रेतरघटोघटत्वेनभासतेनतुछिद्रेतरत्वेनतथासति
लक्षणायांयुगपद्वृत्तिद्वयविरोधेनघटान्वयप्रसंगात्।उभयसाधारणानुपूर्व्यानुपस्थितेश्चानाजहत्स्वार्था।अथसंस्कारादुपस्थितिः

चि॰श॰ नचस्तुचिमतीनांप्रकृत्यर्थेगतत्वार्थान्वयबोधकत्वमुपपन्नेस्तत्रविभक्त्यर्थेनान्वीयेतेतितिवाच्यंप्रकृत्यर्थोहिप्रकृतिप्रतिपाद्योलक्षणीयान्वयानुरो
५॰ धात्।नाशब्दोपस्थितेनैवशब्दस्यान्वयबोधकत्वात्।नचैवमाकाशपदशक्यस्यसंस्कारोपस्थितस्यशब्दान्वयत्वस्पकथंशाब्दानुभवविषयत्वमिति
वाच्यं।नियमतोपदधर्म्मवत्त्वेनोपस्थितेयत्रशक्तिग्रहःतत्स्मरणजनकसंस्कारस्यधर्म्मविषयतानियमेनतदुद्बोधकोदेवत्तदशोपिउद्बोधनियमेना
काशपदादशक्यस्योपस्थितस्यमानात्।अस्तुवातदपिशक्यपदेनियमतउपस्थितिःसहप्रयोगस्यवाच्याद्यपिरत्वेनाप्युपपत्तेःवस्तुतस्तुनिय
तोपस्थितिरेवनास्ति।अस्तुवापदादपिनिर्विकल्पकं।तस्यापिबोधदशायामिवान्वयानुपपत्त्यभावाद्यपिकल्पनानस्यादितिचेत्।तर्हितवापि
कार्यत्वबोधानंतरमौपादानिकसाधनताबोधोनस्यात्।औपादानिकेबोधेनुपपत्तिबोधस्यहेतुत्वात्कल्पनामात्रोच्छेदश्चैवस्यात्।प्रतीतानुप
पत्तिमूलकत्वात्कल्पनायाःवस्तुतस्तुबाधकप्रमाविरहस्ययोग्यतात्वेसंशयसाधारणज्ञानमात्रमेवतस्याःप्रयोजकं।तेनयत्रबाधकप्रमानिश्चयः
तत्रैवान्वयबोधाभावो।अन्यत्रतुतदभावाद्बोधइतिप्रामेयियोग्यतासंशयेनान्वयबोधाप्रतिबंधःबाधसंशयस्याप्रतिबंधकत्वात्।अन्यथा
नुमानाद्युच्छेदप्रसंगात्।अपूर्वेवाच्यत्वेप्यपूर्वस्वर्गसाधनताशस्यात्योग्यतासंशयएवप्रथममपूर्वस्यस्वर्गसाधनत्वानिश्चयात्।उपादान
स्यापितामिधानोत्तरकालीनत्वात्।साधकबाधकप्रमाणाभावेनद्वारसंभावनयासाधनत्वसंभावनातःस्वर्गकामान्वयइतितुल्यं।अपिचयथा रम॰
नक्रियास्थिरत्वयोग्यातथाकार्यमपूर्वमपिविशिष्टंनस्थिरंकृतेर्विनष्टत्वात्।नचाधिष्ठानेऽपूर्वमात्रेसाधनत्वात्तस्यपदार्थैकदेशत्वेनान्वयप्रति ५॰

योगित्वात्। अन्यतन्त्रयविरोधिरूपविरहे योग्यता। अत एव वह्निना सिंचेदित्यत्र न। अग्नेर्न्वयप्रमः। योगे चान्वयविरोधिरूपविरहे योग्यानुपलब्धा त्वगमेवानन्वययोगे आशु विनाशित्वकालांतरभाविफलजनकत्वविरोधीति वाच्यं। अनुभवे काव्यपाने चाशु विनाशिनि कालांतरभाविफलजनकत्वात्। याग्यत्वं ततस्तत्स्त्वात्। अन्यथा पूर्वं वैफल्यात्। अस्मादन्वयप्रयोजकत्वपवन्नृलब्धिरिति चेत् न। ततस्त्वेप्यनाप्तोक्तौ व्यभिचारात्। अन्वयविरोधित्वेन किंचित्प्रतिसंधानं तत्रास्त्येव। अततो बाधकप्रमाविषयत्वस्यैव विरोधित्वात्। कामसाधनत्वज्ञानमेव प्रवर्त्तकं लाघवात्। सिद्धे वेन स्त्विष्टकायो लघूपाये प्रवर्त्तते भोजने न पाके पायत्वात्। ढलाघवी व संनिहिते। अत एव ज्योतिष्टोमादौ अक्रान्त स्वर्गफलत्वेपि गुरूपायत्वेनाननुष्ठानलक्षणाप्रामाण्यापत्त्या फलमत्माकल्प्यते। इष्टोत्पत्त्यनान्तरीयकश्रमजनकत्वं चाप्रतिबंधकं। अपि च काम्याव्यवहितसाधनतया ज्ञातमेव यदि कामी कर्त्तव्यतया वेत्तीति नियमः स्यात् तदा स्वप्नमपि कार्यतया न वगम्येत। अव्यवहिताभिधानात् एवं काम्यसाधनताबोधकाभावात्। उपादानस्याव्यवहिताभिधाने चिरकालीनत्वात्। अव्यवहिताभिधानात् एवं काम्यसाधनताबोधकाभावात्। उपादानस्याव्यवहिताभिधानेऽचिरकालीनत्वात्। अत एव काम्याद्यदृष्टादिप्रकारद्वयं निरस्तं। कार्यत्वानुबोधप्रवृत्तौ वा काम्यसाधनत्वस्यैव हेतुत्वात्। न च कार्ये घटादेर्लिङः शक्तिग्रहः। यथा हि लिङः शक्तिग्रहकाले स्वर्गकामान्वयायोग्यत्वात्। क्रियानिरासस्तथा यागान्वयानुपपत्त्या घटादिनिरासोपि भवेत्। न हि यागविषयको घटादिः संभवति। अन्यथाव्यवहिताभिधानदशायामपि तन्निरासो न स्यात्। स्यादेतत्। स्वर्गकामाद्यन्वयानुपपत्त्या तद्व्यपयोगे लिङः शक्तिग्रहः स्यादपि कार्यं वत्तथा। अतः शक्तिग्रहकाले क्रियानिरासोपपुज्यते। न घटादेः। यजि

शा०वि० पदमंतर्भाव्यस्वर्गकामपदलिङ्पदाभ्यामन्विताभिधानदशायांघटादिनिरासोकासानप्रतिसंधीयते।प्रस्तुतप्रत्ययस्यातंरगप्रकृत्यर्थान्वयबोधप्र
५१ तएवेतरान्वयबोधकत्वमितदन्वेपानुपपत्तिप्रतिसंधानमेवप्राथमिकं।पुरुषदोषादप्रतिसंधानेशक्तिग्रहोभ्रमएवघटादेरशक्यत्वात्।पुरुषविशेषप्र
त्यवाप्यतापत्तेश्च।घटादीनामनंतत्वेनपदितप्रिरासोनशक्यः।तदान्वितामिधानदशायामपिनस्यात्॥पाकादिनोक्रियात्वेनैवपृथिवीत्वादिनानिरास
संभवाच्च।एवंचप्र।चरद्रव्यगुणकर्म्मसुनिरस्तेषुघटकार्यधर्मिणिशक्तिग्रहः।नचविशेषेनिरस्तेपिकार्यसामान्यनेनिरस्तमितिवाच्यं।नहिविशेषाविष
यसामान्यतानसंभवति।एतेनादृष्टसाधारणकार्यत्वेनघटादौशक्तिग्रहइतिपरास्तं।अगृहीतासंसर्गेषुस्थायित्वकार्यत्वस्वर्गजनकत्वेषुतत्तज्ज्ञानेषु
वाशक्तिग्रहइतिचपरास्तस्थायिनांघटादीनांनिरासात्।धर्म्ममात्रेचशक्तिग्रहस्यग्रहेतेनुपयोगात्।किंचतेषुसमुदितेषुशक्तिग्रहः।प्रत्येकंवानाद्यः।प्र
थमंसमुदायस्यैकज्ञानाविषयत्वात्विषयत्वेवापूर्वमेवविशिष्टस्यसत्वेअपूर्वत्वव्याघातः।एकज्ञानविषयस्याकांक्षाधर्म्मधर्मिणोरिवविशिष्टत्वात्।
नद्वितीयः।एवंहिलिङ्पदादस्मरणाच्चपतिपदाच्चयागस्मरणानन्तरंतेषांयौगपद्यमस्ति।नचप्रत्येकंशक्तिग्रहेपिसमुदितमेकमेवस्मरणंलिङ
पदादिप्रयुक्तं।समुदायस्यापूर्वत्वमननुभवात्।स्मरणाच्चपदिसाकांक्षंधर्म्मधर्मिविषयमेकं।तदाअपूर्वत्वहानिः।एकज्ञानानुरुद्धयोःसाकांक्षधर्म्मधर्मि शम०
णोरेवविशिष्टत्वात्।तेहितन्नियतत्वाभावेनस्वर्गादिपदेषुग्रहेतासंसर्गाग्रहमेधर्मिषुशक्तिग्रहइत्युक्तं।प्रत्येकसमुदायविषयस्मरणावि
कल्पग्रासात्।अस्तुवास्वर्गकामकार्यविषयोयागइत्यनुभवेस्वर्गकामयागयोरन्वयप्रकारतयाअपूर्वलाभः।पश्चात्स्वर्गकामकार्यविषयोयाग ५१

इतिशाब्दानुभवानंतरमथोद्यागविषयकंकार्यमितिज्ञानमनुपपत्तिप्रसंगः। अतएवशाब्दबोधानंतरमौपादानिकबोधात्प्रवृत्तिः। किंचापूर्ववाच्य
त्वेपिनकलंजंभक्षयेदित्यादितःकलंजभक्षणाभावविषयकमपूर्वमेवगम्यापिनप्रवर्तेततदभावे। तथाहि। कलंजभक्षणोपरागात्स्वकर्तव्यता
बुद्धिर्जातस्याद्भक्षणाभावे। निष्फलात्कार्यात्सफलगरीयइतिप्रयापिनस्वस्वहेतौभक्षणएवप्रवर्तेतनतदभावेनिषेधापूर्वमेवफलमितिचेत्। न।
लोकेतथानवगमात्। अलौकिकयोःस्वर्गापूर्वयोर्लोकावगतप्रयोजनस्वरूपःस्वाभावनातीपत्याप्रयोजनत्वे। वेदेपिकाम्यस्थलेकाम्यसाधनस्ये
वापूर्वस्यगौणप्रयोजनस्यलिङाभिधानेकाम्यसाधनाज्ञानंविनाकामिकार्यत्वस्यबोधयितुमशक्यत्वात्। ननुस्वतःप्रयोजनत्वेनतत्रासामर्थ्यादनुप
योगात्। प्रत्यक्षेजनादाविवलोकेनास्यकाम्यसाधनताज्ञानात्कार्यताज्ञानाद्गौणप्रयोजनत्वेनैवोपपत्तेः। नापिनित्यनिषेधयोरपूर्वंस्वतःप्रयोजनत्वेन
लिङाभिधीयतेकाम्यस्थलेहिबुभुक्षाहेतुकलिङादिनाप्रवर्तकंकार्यत्वेनापूर्वमभिहितमतोनित्यादावपिकार्यत्वेनैवापूर्वबोधने। ननुस्वतःप्रयोजन
त्वेनाननुनित्येलोकत्वेस्वर्गनगौणपुरुषप्रयोजनाभावेसतिलिङ्वापूर्वस्यस्वतःप्रयोजनत्वंबोधयतितेनविनाप्रवृत्तिपरत्वाभावादितिचेत्। न।
निरुपधीच्छाविषयत्वंहिस्वतःप्रयोजनत्वमपूर्वस्यलिङ्बोधनीयंनचतादृशेच्छाविषयोपूर्वंकश्चिदप्यसिद्धं। नवलिङ्वापूर्वेच्छाजनपित्व
तंबोधयतिस्यात्तत्रासामर्थ्यात्इच्छायाःसामग्र्यंतरजन्यत्वाच्च। अतोपिकाम्येनित्येचइच्छाविषयत्वप्रयोजनत्वमपूर्वस्यलिङादिनानबोध्यते।

वि॰श॰ ५२ अपूर्वेच्छायाः शाब्दज्ञानात् पूर्वमसत्त्वात्। किंतु शाब्दकार्यताज्ञानात्सेति। अप्यनित्यैकार्यत्वेनैवापूर्वस्याभिधानं। ननु स्वतः प्रयोजनत्वेन किंतु
लिङा अपूर्वं बोधितं तत्स्य स्वतः प्रयोजनत्वमिच्छाविषयत्वं भवति सुखज्ञानवदपूर्वज्ञानस्य स्वत एवेच्छाजनकत्वात्। ततः काम्यापूर्वसाधन
ताज्ञानान्निसेकार्यताबोधात् प्रवृत्तिरिति चेत्॥ न॥ अपूर्वज्ञानस्येच्छाहेतुत्वेनाकॢप्तत्वात्। काम्यापूर्वं हि लोके कृतेष्टसाधनताज्ञानादेवेच्छा न त्वपू
र्वत्वज्ञानात्। शास्त्रस्य स्वशास्त्रजन्यकर्तव्यताज्ञानं च बलवदिति चेत्। सफलविषयं न तावदिदं च निलविषयो। अथ प्रवृत्तिमती निवृत्तिर्नियोगे अधिका
रइति पदाभक्रमात् प्रवृत्तेः तदा तन्निषेधे शास्त्रकार्यताधीरितितया विपरीतप्रयत्नेजनिते रागान्निक्रियोत्पत्तिः। तेनैव प्रतिबंधात्॥ रागकारितप्रवृत्तिमु
पजीव्याहि निवृत्तिकार्यता शास्त्रेण बोधिता। अतस्तेन बोधेन स्वफलं विपरीतकृतिरवश्यमुत्पाद्येति शास्त्रं बलवत्त्वमिति चेत्। निवृत्तिकार्यताबोधे विनि
वृत्तौ प्रयत्न एव नोत्पद्यते यस्य प्रतिबंधकता स्यात्। स्याद्वा निवृत्तिकार्यताबोधमप्रमाणानिष्फलत्वेन तत्र कृतेरभावात्। अथ फलेऽजन्मकरणस्य निदं
र्थं वादे नवलवदनिष्टसाधनत्वावगमान्न द्वेषेण न प्रवर्ततेन इति चेत्। एवमपि कलञ्जभक्षणे निवर्तितां तदभावे निःप्रयोजनतया प्रवृत्तौ किं माया
तमिति। एतेन नित्यापूर्वसाधने संध्यावंदनादावपि प्रवृत्तिर्यावत्तेपायाः कष्टत्वात्। तदपूर्वस्य पंडत्वात्। स्वतोऽप्रयोजनत्वाच्च। तस्माल्लोकेऽपचेते राम॰
सादेः कार्यत्वेष्टसाधनत्वरूपवर्त्मसत्त्वमदधि मिथ्याज्ञानादिध्वंसजन्यमुक्तौ च व्यभिचारात्। प्रतिबंधकाभावत्वेन हेतुत्वे तथाभावाच्च। ध्वंसेनानुपपत्ति ५२

म्भेशक्तत्वेन ज्ञा लिङ्: स्वर्गकामो जेतेत्यादौ तद्दत्वं यागे योग्यतादिवशाद्बोधयतीति न वेदे धर्म्मिणो शक्तिकल्पना प्रतीता च स्वर्गसाधनता साक्षा
द्साधनस्य व्यापारं मन्तरेणानुपपद्यमाना स्वनिर्वाहकव्यापारमपूर्वं कल्पयति। ननु निरुपाधिपूर्ववर्त्तिताकारणता सा व्यापारेणानिर्वाहत्वन इति को
र्थः किं क्रियोत्पत्तावुत्पत्ते। नाद्यः उत्तरवर्त्तित्वेन व्यापारस्यैतच्चासामर्थ्यात्। नोत्तरः सिद्धेः वत साधनात्। चिरध्वस्तकारणस्य व्यापारस्यावश्यकमिति चेत्। न। विप
क्षवाधकाभावेनाप्रयोजकत्वात्। अन्यथा दृष्टकारणानामपि दृष्टव्यापारकमिति यागानुभवयोर्दर्शनात्तथा कल्प्येत। प्रायश्चित्तादीनां च फ
लप्रतिबन्धकत्वमेव। प्रायश्चित्तस्य तस्मादेन सः प्रतो भवतीति यस्फलेन श्रुतमस्ति तस्य निषिद्धक्रियातः फलभाक् भवतीत्यर्थः। धर्मः क्षरति कीर्त्तना
दिति च कीर्त्तनादिहिता क्रियाक्षतिफलजनकत्वमित्यर्थः। कृतो सन्नवाधकविनानलक्षणादिति चेत्। न। उपस्थितत्वेन विहितक्रियायामेव धर्म्म
पदशक्तिग्रहस्य वाधकत्वात्। न चैतस्य मुख्यत्वार्थपदार्थान्तरे शक्तिः। लक्षणोच्छेदापत्तेः। विहितक्रियाकर्त्तृत्वज्ञानेन धार्मिकपदप्रयोगाच्च। एतेन
देवदत्तशरीरं देवदत्तविशेषगुणप्रेरितभूतपूर्वकं जन्यत्वे सति तद्भोगसाधनत्वात्तन्निर्मितस्रग्वदित्यनुमानादपूर्वसिद्धिरिति परास्तं। ज
न्मान्तरीयज्ञानादिभिरेव तज्जनकत्वाभिमतैः सिद्धसाधनादिति। मैवं। चिरध्वस्तस्य व्यापारसत्त्वे कारणत्वमिति नियमः। अन्वयव्यतिरेकाभ्यां व्यापारव
त्कारणतया गृहस्य चिरध्वस्तकारणत्वेन व्यापारकल्पनात्। कार्य्यव्यापारस्य पृथगन्वयव्यतिरेकग्रहस्तु व्यापारकत्वं उपाधिरिति चेत्। न। संस्का

चिं॰ प्रा॰ नैतद्भावेप्यनुभवस्य तद्व्यापाराकत्वात् । न चाप्रयोजकत्वं यागे यदि चिरध्वस्तत्वे सव्यापारो न स्यात् । स्वर्गकारणं न स्यात् । घटवदिति विपक्षे बाधात् । न
५३ च स्वकारणता ग्राहकाभाव उपाधिस्तेनापि समं व्याप्यत्वधारणेन तस्याव्यापादनात् । नैवेन्द्रियकस्यातीन्द्रियव्यापारवत्त्वनियमः । सव्यापारत्वे कार्याव्यव
हितपूर्वसमयेऽसत्त्वस्योपाधित्वेनाप्रयोजकत्वात् । न चैवं संध्यावन्दनाकरणस्य दुःखसाधनत्वप्रसक्तेः तत्करणप्रागभावो दुःखहेतुः । तथा च तस्य
स्थिरत्वेन दुःखजननसंभवात् यावे(?) प्रमाणं । न च प्रायश्चित्तवैफल्यं । प्रायश्चित्ताभावसहकृतस्यैव तस्य तज्जनकत्वात् । यद्वा प्रागभावनाशएवतेन क्रि
यत इति । तत्र ध्वंसप्रागभावानवच्छिन्नवच्छिन्नकालस्य प्रतियोगिकालत्वेन तत्करणापत्तेरिति चेत् । न । संध्याकालीनाकरणस्य दुःखसाधनत्वाद्वि
शिष्टस्य संध्याकालापगमेपगमात् । न च संध्याकालीनाकरणे विशेषणं किंतु प्रतियोगिनि करणे तथा च विशिष्टाभावः स्थिर एवेति वाच्यं । संध्याप
स्यकरणेत्वेयस्त स्यपदार्थत्वात् । ननु करणे तस्य पदार्थैकदेशत्वेनाप्रधानत्वात् ।। तथापि ध्वंस एव व्यापारोस्तु । तत्र सहभावानिरूपकस्यापि
कारणत्वात् । तस्मान्न तत्त्वेपि स्वभावात् सावधि फलजनकत्वं यत्र यध्वंसो हेतुस्तत्र तस्य प्रागभावोपीति चेत् । दुग्धध्वंसजन्यदधिमिथ्यात्वनादिध्वंस
जन्यमुक्तौ च व्यभिचारात् । प्रतिबन्धकाभावत्वेन हेतुत्वे तथाभावाच्च । ध्वंसेनानुपपत्तिः कथं नैवं समाधानं तथैतिचेत् । न । ध्वंसे सति तद्व्यापारत्वमानं विनानु राम॰
पपत्तेः तद्व्यापारत्वकल्पनया शांतेरिति । नैवं । प्रतियोगिध्वंसयोरेकत्राजनकत्वात् । नहि नियमतो यध्वंसे सति यत् भवति तत्तत्कारणं न च संसर्गाभा ५३

वत्वेन हेतुत्वे तथेति वाच्यं। व्यभिचाराभावेन तस्यापि प्रयोजकत्वात्। अथ शब्दाद्यागकारणतायां व्यापारं विना तदनुपपत्तेः तज्जन्यध्वंसस्य कारण
त्वस्य प्रमाणान्तरविरोधे नार्थापत्त्या कल्पनात्। अस्तु तर्हि देवताप्रीतिरेव व्यापार इति चेत्। न। यागस्य देवताप्रीतिहेतुत्वे मानाभावात्। गंगास्ना
नादौ देवताविरहेण तदसंभवात्। न च तत्रापि तत्प्रीतिः तत्स्यात् प्रीतिहेतुत्वे मानाभावात्। लाघवेन कर्मोत्पन्नगत व्यापारकल्पनाच्च। ननु नायं नियमः
। पुत्रकृतगयाश्राद्धादिना पितरि पितृकृतजन्मान्तरीयपुत्रे वा दृष्टोत्पत्तेः। अथ तत्रापि कर्तर्येवादृष्टं विहितक्रियायागस्यैव कर्तृगतादृष्टजनकत्वा
त्। न च मृते पुत्रे तददृष्टनाशात् पितरि न स्वर्गः स्यादिति वाच्यं। अदृष्टस्य फलनाश्यतया पितृस्वर्गाभावेनादृष्टनाशात् स्वर्ग इति भोगजनकादृष्टस्य मुक्ति
विरोधित्वात्। ननु पितृगतमदृष्टं जन्यते। मृते पितरि दोषाभावेन योगिनामिव विहितक्रियायाः पितृदृष्टजनकत्वात्। तथात्वे च सांगमपि श्राद्धादिकं निः
ष्फलं स्यादिति तद्विधेरप्रामाण्यापत्तिः। पुत्रगतादृष्टेन च मृते पितरि सुखोत्पत्तौ न विरोधः। योगिनामिव मत्सुखोत्पत्तौ दोषस्याहेतुत्वात्। अथ पितृसु
खं पितृपुण्यजन्यमिति पितरि पुण्यं पुत्रेण विना न तदभावात्। न पुत्रे तत्र फलप्रसंगात् पितृस्वर्गकामनाजन्यक्रिया पितृपुण्यहेतुरिति पुत्रक्रिया पितृपु
ण्यजनिकेति चेत्। एवं पितृपुण्यजनिकेति न तां विना पितरि पुण्यं पुत्रक्रिया च पुत्रपुण्यजनिकेति पुत्रे पुण्यं पितृस्वर्गकामनाजन्यपुण्यत्वेन पितृस्वर्ग
हेतुरस्तु। तत्पुण्यं पितृहेति। तत्सुखहेतुपुण्यत्वात्। न पुत्रहेति तत्सुखाहेतुपुण्यत्वादिति चेत्। न। तत्पुण्यं पन्यपि तद्धेति तज्जन्यसजन्यपुण्यत्वात्

चिं॰प्र॰
५८

पुत्रइतिवा। नतुनपुत्रापत्वात्। तस्मात्पितृस्वर्गकामनाजन्यपुत्रापत्वेनपितृस्वर्गहेतुतेतिपुत्रएवतत्पुत्रापमितिमैवं॥ स्वर्गोपपादकंत्वपूर्वस्वग्नाश्र
येकल्प्यतेप्रथमोपस्थितत्वात्लाघवात्। कल्पनायाःसाक्षाद्गुपपादकविषयत्वाच्च। नचस्वर्गहेतुकामनाश्राया। स्वर्गकामनाजन्यक्रियाकर्तृत्वेवावि
लंबितोपस्थितिकत्वात्। गौरवात्। परंपरयास्वर्गोपपादकत्वाच्चयदिचपुत्रगतपुत्रापनमुक्तस्यशरीराद्युत्पत्तिः सुखंचस्यात्तदासाक्षिविषयाःस्यादभि
धानादितिपुत्रक्रियाजन्यपापेनसविष्टायांहिपितृभिर्लवायितमि। सहपच्यतेडू। स्वादिवोधितनरकभागित्वंविमुक्तस्यपितुःस्यात्।। तथाचपुत्रकृतेनतथावि
धशंकरपानकश्चिन्मोक्षार्थंब्रह्मचर्यादिदुःखेनात्मानमवसादयेत्। दुःखेनाप्यतविमुक्तोश्चातिनसपुनरावर्ततइतिश्रुतिविरोधश्च। तथाचमुक्तस्यसुखदुःखे
शरीरादिकंचभवतीतिअपदर्शनं। मुक्तेपितरिश्राद्धादिनादोषाभावादेवतादृष्टमुत्पद्यतेनैवंसांगस्यैवकल्पं। अदृष्टोत्पत्तौस्वरूपसतोदोषस्यांगस्यैवगुणा
त्। यथाचिरादिहेतुदुरितंभस्मेनकृतंमंगलंनयापधेसजनपतिस्वरूपसतःपापस्यांगस्याभावादितिएवंचयागस्यापिव्यधिकरणापापोभविष्यतीति।। उच्यते
विहितक्रियाकर्तृगतव्यापारद्वाराकालांतरफलंजन्यतइत्युत्सर्गः। सचबलवताबाधकेनापोद्यो। प्रकृतेचबाधकंतावत्। यथाश्राद्धेदर्शितंफलमनुष्ठा
तरीत्युत्सर्गः। पुत्रकृतगयाश्राद्धापित्स्वर्गप्रतिपितकृतजातेष्टेपुत्रस्तत्वादिकंप्रतिहेतुत्वस्यशास्त्रेणावोधनात्। नन्वेवंनियमस्त्वापुत्रजानेष्टिपितृ राम॰
यत्नाद्यपरासंबंधःफलेनपुत्रस्य। एवंस्मृतपुत्रकर्तृत्वादिकमपिपितृगतमेवानचफलस्यकर्त्तातत्वसाक्षात्संबंधेनेवतिवाच्यं। यामयमुपुत्रहिरण्य ५८

दीनांपरंपराकर्तृगतत्वमितिमम विचारात्।नहिप्राणादयःसाक्षात्कर्त्तरिसंबंधाः।एवंचफलस्यसाक्षात्कर्तृगामितावोधकेनशास्त्रेणौत्सर्गिकेनतुस्व
स्यकर्तृगामितावोधेन।यत्तुस्वर्गभागिपितृकत्वफलेनतत्कामनयाप्यत्राधिकारिविशेषणत्वाभासितगतस्वर्गादिकामइतिश्रुतेःस्वतश्चतथाकामन
याप्रवृत्तौश्रौतकामनाविरहेणाप्रयोगवैगुण्यापातात्फलाभावप्रसंगः।किंचस्वर्गभागिपितृकत्वविशिष्टतत्रविशेष्यतत्पितृकत्वेनकाम्यनवाफलसि
द्धत्वात्तदसाध्यत्वाच्च।किंतुविशेषणीभूतपितृगतःस्वर्गइतिसएवफलमिति।तन्न।नहिस्वर्गफलभागिपितृकत्वंफलंअपितुस्वर्गगामिनःपुत्रस्यपरंपरा
संबंधरूपंतदुक्तमिति।उच्यते।परंपरासंबंधेयदिसुतत्वपितृस्वर्गस्यतदासंपुत्रसमवायेनपुत्रेतरस्यापिफलंस्यात्।ससंबंधोनाशास्त्रबोधितइ
तिचेत्।नहिस्वर्गभागिपितृकत्वमपितथा।शास्त्रेणाबोधितत्वात्।अथान्यथाश्रुतिहिरण्यादीनांचसिद्धेनतत्काम्यत्वंकिंतुतद्विषयकस्वकाम्यफलमपित
देव।तत्रसाक्षात्स्वकर्तृगतमितिकर्तृगतत्वेनफलस्यसाक्षात्संबंधोनियतएवतस्यापिहततत्त्वेनफलेकामनातेहतमेवशास्त्रबोधितफलंअत्रनएवकाम
नाविषयःस्वर्गतएवस्वर्गःफलंपागादेः।स्वर्गाद्यन्ततत्त्वादेश्चपितृपुत्रगतत्वेनकाम्यत्वमितिश्राद्धजातेष्ट्यादेःपितृपुत्रगतमेवफलं।एवंचमातापित्रा
दिगतस्वर्गकामनयापुत्रादिनाकृतपुष्करिणीमहादानादिकमातापित्रादिस्वर्गजनकमेवकामनाविषयस्वर्गसाधनत्वेनतेषांश्रुतत्वात्।नहि
स्वगतस्वर्गकामस्यकर्त्तव्यतापुष्करिण्यादेर्विधिर्वोधयति।तथाश्रुतेः।किंतुस्वर्गकामस्यस्वर्गश्चस्वगतःपरगतोवेतिस्वर्गकामत्वमपिविशेष्यहेते

त्रिं·शा० त्यात्तेनेपदमपिकर्त्तमिप्रेतक्रियाफलमात्रजनकत्वान चस्वर्गकामोदघादिस्यादेस्वर्गतस्वर्गकामनायाअंतरंगत्वात्औत्सर्गिकत्वाच्चस्वर्गकामत्वेन
५५ स्वर्गतस्वर्गकाम एवोच्यते।सामान्यबाधकं विना विशेषपरत्वेमानाभावात।किंचित्तु सम्यग्गृहस्थाश्रमपरिपालनस्यत्र लोकावाप्तिःफले
श्रूयतइतिजीवेत्पितृयज्ञयोरपिगृहस्थकर्म्मत्वेनात्देवलमितिफलस्यकर्तृगामित्वेनियमएवाप्राप्तिस्विकफलाभिप्रायेणात्तंगइत्याकुः।ननु
यावज्जीवपरिपालनस्यतत्फलत्वेनैवकाम्यश्राद्धादेःकाम्यत्वप्रमाणाभावात।यावत्काम्यानुष्ठानाशक्तेश्च।यावत्कानुष्ठानस्यापिनातत्वेभावः।कामना
विरहादिनाप्यकरणात।यावज्जीवानुष्ठानेनतत्फलाभावप्रसंगात।नित्यस्यैवावश्यकत्वेनोपस्थितसान्वयाच्च।।अपिचतैःकर्म्मभिःप्रत्येकमुत्पत्स्यद्वज्जन्म
तेतैश्चपरमार्थंवजन्यतइतिनगौरवान्मानाभावाच्च।किंत्वतिमक्रियपायपरिपालनस्यक्रियातेरणावेतिनसर्वकर्म्मत्र ह्मलोकावाप्तिफलेश्रूयतइति
जीवेत्पितृयज्ञयोरपितथाहतयोस्तदेकफलं।तथाचभगवद्गीता।।यज्ञायाचरतःकर्म्मकर्म्मग्रंथिविलीयते।।यज्ञार्थात्कर्म्मणोन्यत्रैकप्रयोगस्यव्य
वधानादसंभवः।परिपालनेनतुकर्त्तव्यमित्येवराणां।तत्रलोकोयंकर्म्मबंधनइति।तच्चकर्म्मयज्ञार्थंतथाप्रत्येकमेवतत्फलसमर्थंसंवत्ननतुमंगलवड एम०
यपुज्यते।अन्यथैकप्रयोगस्यव्यवधानादसंभवःपरिपालनंतुकर्त्तव्यमित्येवराणांतदुक्तं।ददामिदेयमित्येवयजेपश्चयमित्यहमिति।यत्तुनिषि ५५
द्धासंबंधएवसम्यक्त्व।नतुविहितमात्रानुष्ठानमिति।तत्र।यत्किंचिन्निषिद्धासंबंधस्याभावात।।सर्वेनिषिद्धासंबंधस्यसर्वेत्रसलभत्वादितिसंप्रदायः

तत्र प्रश्नः। भगवदुद्देशेन कृतं किंचिदेव कर्म सर्वं वा। काम्यं वा सर्वं नित्यं वा सर्वमिति। नाद्यः। एकेनैव काम्येन नित्येन वा ज्ञानेन न तथाकृतेन तत्फल
सिद्धौ बहुवित्तादिसाध्याश्वमेधादावप्रवृत्त्यापत्तेः। नापरो अशक्यत्वात्। ननु यः। ज्ञातेष्वादेर्तिस्वत्वाभावात्। तस्मात्तस्य गृहस्थाश्रमपालनस्य तत्फ
लं। न सम्यक्तनुसामस्यमेव। अतो नश्वादेर्ब्रह्मलोकावाप्तिः फलमिति सा च के शास्त्रादेशितं फलमनुष्ठातरीत्युत्तरङ्गदिति। तत्र फलं क्वचिद्विधिवा
क्यश्रुतं क्वचिदर्थवादिकमिति। न चार्थवादादीनामसिद्धार्थतया न प्रामाण्यं कार्यान्वितस्यैव पदानां शक्त्यवधारणात्। व्यवहारादेव सर्वेषामाद्यव्युत्प
त्तिः। उपायान्तरस्य शब्दव्युत्पत्त्यधीनत्वात्। तथाहि। ॥ प्रयोजकवाक्योच्चारणानन्तरं प्रयोज्यप्रवृत्तिमुपलभमानो बालः। प्रेक्षावद्व्यवहारस्य प्र
योजनजिज्ञासाधीनत्वान्वयव्यतिरेकानुविधायित्वादुपस्थितत्वाच्च प्रयोज्यप्रवृत्तिमेव प्रयोजनजिज्ञासाधीनत्वात्तदन्वयव्यतिरेकानुविधायित्वादुप
स्थितत्वाच्च प्रयोज्यप्रवृत्तिमेव प्रयोजनमवधारयति। न चाकिंचित्कुर्वतस्तादर्थ्यं सम्भवतीति तज्जन्यं प्रवृत्त्यनुकूलकार्यताज्ञानमेव कल्पयति।
स्वप्रवृत्तौ च तेन कार्यताज्ञानस्य हेतुत्वावधारणात्। न्यायनप्रवृत्तेः कार्यताज्ञानैकरूढत्वात्। न चैवं शब्दस्य ज्ञानद्वारा प्रवृत्तिहेतुत्वं स्वप्रवृत्तौ बाले
न शब्दाहितविशेषस्य कार्यताज्ञानस्य हेतुत्वमनवधारणात्। ज्ञानेन प्रत्यक्षादिनानोपायकत्वदर्शनात्। शब्देऽपि कार्यान्वितज्ञानहेतुत्वमवधार्यते तत्र
शक्तिं कल्पयति। उपस्थितत्वात्। पश्चादावापोद्वापेण क्रियाकारकपदानां कार्यान्वितत्वे तत्तदर्थेषु शक्तिं गृह्णातीति प्रथमगृहीतसामान्यशक्त्यनुरोधा

न॥ स्यादेतत्। यद्यपि वृद्धव्यवहारादौ कार्यान्वितधीरनुमिता तथाप्यन्वितमात्रशक्तैव कार्यवाचकपदसमभिव्याहारादाकांक्षादिमहिम्ना कार्यान्वि
तधीसंभवान्न कार्यांशेपि शक्तिः। परंपरयापि शब्दस्य कार्यान्वितज्ञानानुकूलत्वादर्थापत्त्या वस्थापयति। पि। अवश्यं चाकांक्षादेः कारणत्वं कार्यांश
शक्तावपि तद्व्यतिरेकादन्विताभिधानव्यतिरेकनियमात्। सति वाकांक्षादौ कार्यव्यतिरेकदर्शनादन्विताभिधानव्यतिरेकोवकाप्याप्ति। अन्यथा गवादिप
दानामकार्यान्वयेपि शक्तिः स्यात्। संस्कारादेव व्युत्पत्तिलाभदर्शनात्तथेति पदितदाकार्यवाचकपदादेवकार्यान्वितत्वलाभ इति किं शक्त्या वृद्धव्यवहारे नियमतः कार्या
न्वितज्ञानं दृष्टमिति तत्र शक्तिकल्पनं वृद्धव्यवहारे शब्दस्यापि तेनैवान्वयबोधदर्शनाद्दृष्टसन्निधावप्यन्वयबोधहेतुत्वकल्पने द्वारमित्यादौ शब्दव्या
ह्रियेते। केचिदसंसृष्टवाक्ये वृद्धव्यवहारादावनुमानेः शाब्दसन्निधिर्व्यभिचरतीति चेत्। न हि सिद्धार्थेप्यन्वयप्रतीतिदर्शनात्कार्यत्वमपि व्यभिचा
रि। तद्वत्तत्र लक्षणा। बाधकाभावात्। शक्तिकल्पनाप्रियात्वमत्र लक्षणानुमता। इह तु नघीयस्याउभयसाधारणपदार्थमात्रशक्त्यामुख्यत्वे स्यैवोचित
त्वात्। किंच कार्यत्वावच्छिन्नादीनामाकांक्षाधीनयेतपदार्थान्वितस्वार्थबोधकत्वमेव शब्दवाच्यमतो विशेषास्पदानंतराणामपि तथात्वमस्तु लाघवादिति
॥मैव॥ व्यवहारहेतुतयानुमिते हि कार्यान्वितज्ञाने अन्वयव्यतिरेकाभ्यां शब्दस्य साक्षात्कारणत्वमवधारयति। न परंपरया। साक्षात्त्वे सोत्सर्गिकत्वे न तत्सं रा०म०
भवेत् परंपरायाश्चाप्रामाण्यत्वादिति तत्रैव शक्तिं कल्पयति। नान्वितज्ञाने पदार्थज्ञाने वा प्रवर्तकतया प्रकृतस्य कारणत्वे न तयोरनुपस्थापनात्। न ५६

वान्वितज्ञानशक्त्याद्यपि परंपरया कार्यत्वधीः संभवतीत्यर्थापत्त्यासैव कल्प्यतां लाघवात् । ननु विशिष्टज्ञाने शक्तिरन्यलभ्यत्वादिति वाच्यं । अर्थापत्तेः ।
साक्षादुपपादकमात्रविषयत्वेनाधिकाग्राहकत्वात् साक्षादुपपादके कार्यान्वितज्ञाने शक्तिः कल्प्यते । लिङादीनां शक्तेरकल्पनादन्यलभ्यत्वकल्प्या
प्यभावात् । आद्यव्युत्पत्तेर्विचार्यत्वात् । किंच प्रकृतिकारणात्तयोपस्थितं कार्यान्वितज्ञानमपहायानुपस्थितमिति लाघवात्कार्यांशमपहायान्विते शक्तिर्गत्व
तामिति चेन्न । ज्ञाने हि पदानां शक्तिः शक्यत्वात्तन्नार्थे अन्यथा कार्यान्वितज्ञाने अन्यदन्वितज्ञानं विषयभेदेन ज्ञानभेदात् । तदुक्तं सम्भाववादे । अन्यभूत
लज्ञानमन्यत्र घटवन्नूतलज्ञानमिति अन्वितज्ञानमनुपस्थाप्य तत्र शक्तिग्रहे इति गौरवमेव लघुनि शक्ये संभवत्यन्यगुरुनतत्वमिति चेत् । न । युगपदुपस्थि
तौ तथात्वात् । न चानस्याप्यनुपस्थितिः पुरुषविशेषदोषात् । सैवैरवाद्यव्युत्पत्तेस्तथानवगमात् । तथापि न कार्यान्वितशक्तिः कार्यबोधि लिङादीनां व्यभिचारादि
ति चेत् । सर्वपदानां कार्यत्वविशिष्टधीजनकत्वात् । तत्र कार्यान्वितस्वार्थप्रतिपादकत्वं तत्येतरान्वितस्वार्थकप्रतिपादकत्वं यया वेति वयं यथा कार्यान्वित
व्युत्पत्तौ सत्यां अनाकांक्षादौ व्यभिचारादाकांक्षादेरप्याधिक्यं । तथा चोपजीव्यप्रथमक्षाविकार्यान्वितव्युत्पत्त्यनुरोधेन विशेष्यकताचयिकाद्याहारः क्वचि
ल्लक्षणा क्वचिदसंसर्गाग्रह इति । सिद्धार्थे त्वप्रतीतिदर्शनादुत्तरकालमन्वितमात्रे शक्तिरेव कल्प्यतां । प्राचीनकार्यान्वितज्ञानं वाप्यतामिस्यप्यत एव नि
रस्तं ॥ एवं कल्पनातः कल्पनान्तरप्रसंगात् उत्तरकालभाविसिद्धार्थप्रयोगस्य लक्षणादिभिरप्युपपत्तेरन्यथासिद्धत्वाभावे न प्राचीनहानावाधकत्वात् ।

चि० श० उपजीव्यत्वाद्बाधात्। अथ सिद्धार्थेपि व्युत्पत्तिः संभवति तथाहि कपलब्धचैत्रपुत्रजन्मवार्त्ता हृष्टो नैव वार्त्ताहारेण सह चैत्रसमीपं गतः चैत्र पुत्र
५७ स्ते जात इति वार्त्ताहारकवाक्यं श्रावयन्तं चैत्रस्य मुखप्रसादं च पश्यन् श्रोता हर्षमनुमिनोति हर्षोत्पत्तिकारणं पुत्रजन्मज्ञानं कल्पयति उपस्थितत्वादुपपा
दकत्वाद्न्यायस्थितिगौरवात्तत्र वाक्यस्य कारणतां कल्पयति लाघवादिति चेत्। न हर्षहेतूनामनेकेषां संभवात् हर्षेण लिंगेन पुत्रजन्मज्ञानस्य बाले नानु
मातुमशक्यत्वात्। प्रियान्तरज्ञानस्य परिशेषयितुमशक्यत्वाच्च। अथ पुत्रजन्मज्ञानाव्यभिचारिहृष्टिश्रावादिक्रियाविशेषदर्शनात् पुत्रजन्मज्ञानानुमा
नमिति चेत्। तर्हि पुत्रस्ते जात इति वाक्यात्तत्र क्रियाकर्तव्यतापरमेवेति कार्यान्वितज्ञानजनकत्वमेव तस्य प्रथमतो गृह्यते। उत्तरकाले पुत्रजन्मज्ञानानुमा
नमिति न व्युत्पत्तिः कार्यं जहाति। यत्रापीह मकारान्तरैरमकरपि कोपौतौ तिप्रसिद्धार्थायद्सामानाधिकरण्यादिभिर्व्युत्पत्तिः तत्रापि व्यवहाराधीनव्युत्पत्ति पू
र्विका कार्यान्वित एव पक्वाप्यिकवदेशक्तिः पूर्वमवधारितेति चेत्। न। तत्रापि पिकमानयेत्यादौ कस्यचित्कार्यान्वित एव कृतव्युत्पत्तेः। उपजीव्यजातीय
तया बाधस्य बलवत्त्वात्। किंच इमपि यद्देकार्यान्वितज्ञानशक्तं पदं लाघवादिति सामान्यतो वागतं स्वार्थविशेषः परं नाधिगतः सन्दानीं तु वृद्धोपदेशादिति खण्ड
(प्य)ते। अतः सिद्धप्रवृत्तिपराणां शब्दानां प्रवर्त्तकज्ञानवाक्यात्तत्रैव कृतिस्याक्षात्। क्वचित्परंपरया कार्यान्वयात्। अत एव विधिशेषीभूतानामर्थवादादीनां स्वर्गादि श०म०
पदशक्तिग्राहकाणां च प्रवृत्तिपरत्वेन परंपरया कार्यत्वया कार्यान्वितस्वार्थबोधकत्वं यत्र पुराणभारतादिपाठे फलं श्रुतमस्ति तत्रार्थवादकल्पितविधि ५२

शेषीभूतत्वेन प्रवृत्तिपरत्वमेवैतेषामिति परंपरया कार्यान्वयात् कार्यान्वितस्वार्थबोधकत्वं स्वरूपाख्यानपराणां तु कामनाटकादीनां पदार्थो
संसर्गग्रहेण संसर्गव्यवहारेण संसर्गग्रह इति उच्यते॥ ॥घटमानयेति वाक्यश्रवणानन्तरं प्रयोज्यस्य घटानयनगोचरप्रवृत्त्या घटानयन
कार्यताज्ञानमनुमितं बालेन। ननु कार्यान्वितज्ञानं प्रवृत्तिविशेषे तस्या हेतुत्वात्। घटादिपदशक्तिग्रहेऽनुपयोगाच्च तत्र ज्ञानविशेषे घटमानयेति
वाक्यविशेषस्यानाकलितपदविभागस्य हेतुत्वमवधार्य घटपदशक्तौ पाधात्तु विधिप्रत्ययानां प्रत्येकमावापोद्धारेण घटकर्मत्वानयकार्यत्वज्ञानेषु
प्रत्येकं कारणत्वमवगम्य शक्तिं कल्पयति। यश्चात्प्रवृत्तिसामान्येनानुमितिकार्यत्वान्वितज्ञानेन वाक्यमात्रस्यान्वयलभ्यत्वेन कार्यांशमपहायान्वितज्ञान
मात्रे कारणत्वं कल्पयति। ननु प्रथमं वाक्यमात्रस्य कार्यत्वान्वितज्ञानमात्रे हेतुत्वकल्पने। अथ घटानयनक्रियायां प्रथमं क्रियात्वज्ञानात् प्रवृ
त्तिमात्रानुमानात्तेन च कार्यान्वितज्ञानमनुमापयते वाक्यमात्रस्य हेतुत्वं कल्पयित्वा शक्तिं कल्पयति तदुत्तरं विशेषयोः कार्यकारणभावबोध इति चे
त्। न। प्रथमं प्रवृत्तिमात्रकार्यान्वितज्ञानमात्रयोरनुमानबालस्य क्रमशो भवतीत्यत्र मानाभावात्। घटादिपदशक्तिग्रहस्य तु तेन विनापि संभवात्।
न च तदनुमानसामग्री तदा हेतुरिति वाच्यं। तदा व्याप्त्यादिस्मृतौ मानाभावात्। सामान्ययोः कार्यकारणभावग्रहो विशेषयोस्तथात्वग्रहे तु रिति वे
त्। न। विशेषयोरन्वयव्यतिरेकाभ्यामेव तद्ग्रहात्। यथा धूमवह्निविशेषयोः कार्यकारणभावग्रहे तत्सामान्ययोरपि हेतुहेतुमद्भावो भासते त्र

चिं० शा० न्यथानसहचारदर्शनेनाव्याप्तिः स्यात्तथात्रापि विशेषयोः कार्यकारणभावविति वेद्य एव सामान्ययोस्तथाभाव इति चेत् । न । विशेषयोरनुमितौ न सा
५८ मान्यमिति न युगपदुपस्थितिः ॥ अथ विशेषयोः कार्यकारणभावात्सामान्ययोरपि तथात्वमनुमायप्रतीतिरिति चेत् । तर्हि विशेषयोः कार्यकारणभा
वावगमः प्राथमिक इति कारणतोपस्थितकार्यान्वितज्ञानस्य पहायान्वितज्ञानकल्पयितृत्वात् तत्र शक्तिकल्पनमयुक्तं उभयथा गौरवादिति । तन्न ।
कार्यान्वितज्ञानेऽन्वितज्ञानस्य मूलत्वात् । तद्विशेषत्वात्तस्य । अतस्तत्रैव शक्तिग्रहेण कार्यत्वांशेऽपि । अत एव घटवन्मूतलज्ञाने मूतलज्ञानत्वम
पीति तन्निरूपितज्ञानमभावव्यवहारकत्वपायि स्वीकृतम् । अस्त्वेवं । किंतु न तदुपस्थितावप्यन्वितज्ञानत्वं न विषयत्वात् । विशिष्टज्ञानसामग्रीतो
विशेष्यमात्रे इति तस्योपस्थितिस्तत्र कल्प्यमिति चेत् । न । कार्यान्वितज्ञानत्वेऽन्वितज्ञानत्वं न विशेष्यमिति तदुपस्थितौ तस्यापि विषयत्वात् । विशिष्टज्ञान
सामग्रीतो विशेष्यमानावश्यंभावात् । अन्यथाप्यतातिज्ञानमप्यजातिविशिष्टज्ञानमिति व्यक्तिज्ञानमपहाय जातिज्ञानं शक्यं नोपस्थितमिति न
तत्र जातिरेव पदार्थः स्यात् । जातेः केवलोपस्थितौ च न व्यक्तेः समानसंवित्संवेद्यत्वम् । अथ जातिविशिष्टज्ञानोपस्थिते व्यक्तिज्ञानविषयत्वेऽपि गौरवा राम०
भावेऽन्यलभ्यत्वाच्च जातिविशिष्टज्ञानत्वेन शक्यतावच्छेदकं किंतु जातिज्ञानत्वं लाघवादिति मतं । तर्हि तुल्यं । न च युगपदुपस्थितौ लाघवावतारोत
यावद्युगपदुपस्थितिरिति वाच्यं विशिष्टज्ञानस्य विशेष्यविषयत्वनियमात् । किंच ममेदं कार्यमितिज्ञानसाक्षादुपयाद्दकप्रवृत्त्याख्यकारणत्वेनानु ५८

मितमतस्तत्रशक्तिग्रहोपातसाक्षादुपपादकविषयत्वात्कल्पनायाः। नचेदंकार्यमितिज्ञानेनतस्यसाक्षादुपपादकोपपादकत्वात्। अथेदं
कार्यमितिज्ञानशक्तैवपरंपरयाऽनुमानद्वारा ममेदंकार्यमितिज्ञानसंभवादस्यान्यथासिद्धत्वेननशक्तिकल्पनातच्चतहितान्वितज्ञानेनशक्तेःस्वकार्यंवा
वकसमभिव्याहारेणैवकार्यान्वितज्ञानसंभवादन्यलभ्यत्वेनतत्रशक्तिकल्पनमितितुल्यम्। नचेदंकार्यमितिज्ञानंसाक्षादेवप्रवर्त्तकंकर्त्तव्यताप्रयो
जकयावदेकविशेषणस्यस्वगतत्वप्रतिसंधानसहकारितेननातिप्रसंगः नचसहकारिविलंबेनकार्यानुत्पादेनसाक्षात्साधनत्वंनिवर्त्त
तइतिचेत्तान। लाघवेनममेदंकार्यमितिज्ञानादेवप्रवृत्तेः। यथाचभविष्यत्विषयाकार्यत्वानुमितिस्तथोक्तमधस्तात्। अपिचयादृशस्यपुरुष
स्याविगीतचेष्टासाध्यमिदंतादृशोहमितिधीर्नप्रवृत्तिहेतुः कृतिक्षिप्रमाणाविषयकेकृतिसाध्यताज्ञानस्यासिद्धेर्विषयस्यासिद्धविषयेच्छानु
त्पादकत्वात्। इच्छायाःस्वप्रकारकधीसाध्यत्वेनकृतिसाध्यमितीच्छाया। स्वकृत्यनंतरंभविष्यत्तायाम्प्रकृतिसाध्यताधीनजन्यत्वाच्च। अपिचाऽसम
भवंकार्यान्वितज्ञानेवाक्यस्यसाक्षात्कारणतावोधात्तत्रशक्तिग्रहः तथाप्यावापोद्धाराभ्यांपदविशेषस्यतदन्वितस्वार्थज्ञानेशक्तिकल्पयतिलाघ
वात्। नचकार्यत्वासेपिगौरवात्। अननुलभ्यत्वाच्चानचैवंप्रथमप्रवृत्तसाक्षात्कारणतावोधस्यतन्मूलकार्यान्वितज्ञानेशक्तिग्रहस्यववाधः।
स्यादितिवाच्यम्। दृष्टत्वात्तदन्यथासिद्धिमपश्यतोवालस्यसमन्तरइतितस्याबलवत्त्वात्। गौरवान्यलभ्यत्वतर्कसहकृतप्रमाणजन्यत्वेनोत्तरस्य

चिं॰ग्र॰ बलवत्वात्।नचोपजीव्यविरोधान्नतथात्वमितिवाच्यं।उपजीव्यत्वमानाभावात्।द्वित्वादिप्रत्यक्षमतद्ग्रहमनुपदविशेषशक्तिग्रहेतस्यहेतुत्वात्।तेन

५९ विनापितत्संभवात्।नचप्राथमिकत्वेनबलवत्वं।व्यभिचारात्।नापिसंदेहःप्रतीयमानत्वेनबलवत्वंसंदेहाशरीरांहप्रत्यक्षंहेद्वताद्कायवि

मातापसर्वेरल्पग्रहेचव्यभिचारात्।अतएवपूर्वकल्पनातःकल्पनांतरप्रसंगादितिनिरस्तंपत्रान्यथासिद्धत्वेपोपजीव्यतयावाबलवत्वं

पूर्वकल्पनायास्तत्रतथात्वात्।किंचप्रत्यक्षंकार्यान्वितज्ञानेवाक्यस्यसाक्षात्संशयोदासीनकारणत्वमात्रंगत्यते।ननुविशेषोपिउपगम्यावि

यव्यतिरेकादेकमयविशेषसाधारणत्वेनतत्संशयकृत्वात्।उत्सर्गोपिबाधकाभावनिश्चयसहकृतोनिश्चायकः।नचाप्यलभ्यत्वस्यबाधकस्या

भावमापततःस्वतोदृष्टांतमात्रेणबालोनिश्चेतुमर्हति।अतएवप्रामाण्यस्यौत्सर्गिकत्वेपिबाधकाभावनिश्चयादेवनिश्चयः।अन्यथाप्रामाःप्र

माणसाक्षात्साधनेपरगसाध्यंनचेतिसंशयःकोपिनस्यात्पश्चाद्धर्षहेतत्वावह्नासंभवादिति।तत्राप्यतोगृहीतहर्षहेतुस्तनपानादेर्वाधावता

रादृष्टस्यहहेतोरग्रहाद्धुपस्थितत्वाद्युपकारकत्वाच्चपुत्रजन्मज्ञानस्यैवहर्षहेतुत्वेनकल्पनात्।अन्यप्रियज्ञानेहर्षकारणंभविष्यतीतिशंक राम॰

याकथमेवमितिचेत्॥ ॥एवंहिकार्यान्वितज्ञानेपिशक्तिर्नगृह्येत।प्रयोज्यज्ञानेहेतुत्वावहत्वात्।अनन्यथासिद्धशब्दानुविधानस्यचतुल्यत्वा ५९

त्।अन्यप्रियज्ञानस्याज्ञानाच्च।ज्ञानेपिवाक्तदुपस्थितिनियमेमानाभावात्संदेहाभावोपपत्तेः।लिंगाभासजन्मेकाकतालीयसंयत्रसंवादानुपि

तिवर्षेगालिंगेन पुत्रजन्मज्ञानानुमानसंभवात् न चाभासजन्यत्वेनानुमिते भ्रमत्वात् तद्धेतुकशक्तिग्रहे भ्रमः विषयस्य तथाभावेन तयोर्यथार्थत्वा
त्। यथा कश्चित् तत्र सचाराधिष्ठितदारुपुत्रकं घटमानयेति नियुङ्क्ते स च तमानयति। तदा चेतनव्यवहाराश्चिन्तदर्शी। बालोप्युत्पद्यते द्रव्ये क्रियाहितदृष्ट्वा
साज्ञानजन्यात् हादिकजन्यमित्यनुमितिपरंपरया भ्रमत्वेऽपि तद्धेतुकशक्तिग्रहः तज्जन्यशाब्दबोधश्च यथार्थ एव विषयस्य तथाभावादिति सिद्धं सिद्धार्थे
शक्तिग्रह इति। अत एव पत्रकुः खेन संभिन्नं न च ग्रस्तमनन्तरं। अभिलाषोपनीतं च यत्तत्सुखं स्वः पदास्पदमिति अर्थवादोपस्थिते सुखे वेदोऽदेवस्वर्गप
दस्य शक्तिग्रहः। ननु चंदनादौ सुखोपरागेण स्वर्गपदप्रयोगाद्रूपता दृशा पूर्वोप्रयोगात् तत्र स्वर्गमेव शक्यं वक्तुमित्यपापा ससाध्येन तन्नैकर्मणा सा च
मात्रार्थात प्रवर्तित इत्यर्थवादोपस्थिते स्वर्गपदतात्पर्ये न चार्थवादस्याप्रमाणत्वात् तद्युपनीतेन न एव शक्तिग्रहः। तस्य स्वर्गपदतात्पर्यविषयत्वेनाम
दत्त्वोपपत्तेर्न वृत्तिकल्पनाभिधायकत्वे गौरवात्। सुखमात्रे चाप्रयोगादिति तत्सुखत्वं वाच्यं प्रयोगोपाधिर्वा अतिशयः। न चातिशयस्य साध्यत्वेन चंदने स
त्वेऽस्मादयं स्वर्गादिति धीः स्यात्। तस्मादविवातिशयस्य जातित्वेनावच्छेद्यानिरूप्यत्वात्। अतिशयपदप्रयोगस्तादृशतरता नापेक्ष इति चेत् न। विविचेहेतुसा
ध्यनयाविलक्षणातिशयस्यानेकत्वेनाननुगमात् सुखत्वावान्तरजातिशयत्वेनानुगमश्चानध्यवसायेन शक्तिग्रहादप्रसाधनैः। सुखवान्तरजातेश्च सु
खमात्रसाधारणत्वाभावप्रयोगाप्रावेशिकाकार्यत्वात्। लौकिकलक्षणा। ननु दुःखासंभिन्नसुखस्य शक्यत्वे चंदनादौ स्वर्गपदप्रयोगो लक्षणयापि न स्या
त्। सातिशयसुखस्य शक्यत्वे तत्संबंधितया चंदनादौ लक्षणा भवति। तस्मात् दुःखासंभिन्नत्वादिनोपलक्षिता सुखत्वावान्तरजातिरेव शक्या

१३

विं॰श॰ लाघवादितिचेत्॥ एकजातीयहेतुसाध्यएकजातित्वेपिविलक्षणाहेतुसाध्यस्वर्गाद्येकजातौमानाभावात्। विहितकर्म्मजन्यतावच्छेदकविशेषत्वेनै
६॰ केनाननुगतस्यापिजन्यतावच्छेदकत्वात्॥ संबंधमात्रंलक्षणावीजमितिवक्ष्यते। एवंदेवतापामपिइंद्रमुपासीतेत्यादौलोकेप्रयोगस्यानियमाकौशा
न्तयैवव्यवहाराद्यर्थनिश्चयसापेक्षलौकिकोसहस्राक्षादाविंद्रादिपदशक्तिग्रहः। प्रमाणंवेदःसहस्राक्षइत्यादिर्विधिसमभिव्याहृतोर्थवादएव।
स्वर्गपदवत्। अप्रसिद्धस्वर्गपदेप्रयोगस्यथानुपपत्तेस्तत्रैवस्वःपदास्पदमितिश्रुतेश्चार्थवादादेवशक्तिग्रहः। नचेहतथार्थवादः किंतिइंद्रःसहस्राक्षः
इत्यादिः तस्यवक्तावकत्वेनप्रकृतिपरत्वमितिचेत्। न। इंद्रःसहस्राक्षइत्यादिप्रसिद्धपदसामानाधिकरण्यप्रतीतेर्बाधकविनासहस्राक्षस्यैवेंद्रादिप
दवाच्यत्वावधारणात्। प्रसिद्धपदसमभिव्याहारेणप्रतीयमानमर्थमबाधितमादायैवतथाप्रकृतिपरत्वात्। मंत्रप्रकाशितेनशचीसखत्वाद्युपेतमुद्दिश्यहविस्त्या
गेनतत्त्वैवयाज्ञिकानांदेवताव्यवहारात्। अपिचशिवायेंद्रायादित्यादिनादेवतासंप्रदानत्वश्रुतेश्चबाधकविनाचेतनैवदेवता॥ अथदेवताचेतन्ये
तत्प्रीतिरेवयागव्यापारइतिनापूर्वसिद्धिरितिचेत्। न। प्रीतेःसुखस्यतदनुभवस्यवाश्रुतरविनाशित्वात्। नचजन्मसंस्कारस्यवाविषयफलाहेतुत्वा
तायफलहेतुस्यापिकृतिव्यापारापेक्षयालाघवेनकृतिसमानाश्रयस्यैवव्यापारत्वकल्पनात्। नानायागेष्वेकदाकालैकदासंनिधानेनतद्बुद्धिविशे रम॰
षायवात्प्रतिष्ठाविधिनाप्रतिमादावहंकारादिवत्। अथराजसेवादिफलत्वेनश्रुतेरिंद्रादिश्चेतनएव॥ देवतावेनुतस्यनेतिमानाभावात् किंतुदेश
नादेशिनचतुर्थ्यंतपदनिर्देश्यत्वंदेवतात्वमितींद्रायेत्यादिपदमेवदेवता॥ अतएवाग्निप्रकाशकमंत्रेणाग्निप्रकाशनानंतरमग्नयइत्यइतिनियमतोहविर्ग ६॰

नपर्यंतेरणान्नैवेंद्रोद्देशेनहविस्त्यागः इंद्रनिष्टं किंचिज्जनकः। तत्संन्रूपाजनकत्वेसनितद्देशेन त्रिपमाणाभावात्। त्रासनणापदानवदितिवाच्यं।
अप्रयोजकत्वात्। नदर्थत्वेन विपमाणान्वस्योपाधित्वाच्च। इंद्रायस्वाहेत्यत्र नतादर्थ्ये चतुर्थी किंतु स्वाहादियोगोपपदविभक्तिरेव। अन्यथा नमःस्वा
हेत्यादिस्थलेचपष्ठ्यादितिमेव। चतुर्थ्यंतपदस्यदेवतात्वेमानाभावात्। चतुर्थीविनापींद्रोदेवतेतिदेवताव्यवहारात्। अग्न्यपेक्षयाऽऽहनायेत्यादौ देव
तापपसंगात्। इंद्रः सहधीक्षइत्यर्थवादसेंद्रस्तुप्रसीतेतिसमभीव्याहारेणोकवाक्यतपात्तस्येवोपास्यत्वात्। शिवस्वनादृशीतेसवमहादेवमुद्दिश्य
त्यक्तेपिविशिष्टानामिष्वव्यवहारात् अग्नयइतिपदेननियमतत्त्वागश्रुतिबोधितत्वेनतथात्यागस्यफलहेतुत्वात् नचबीजाक्षराणां देवता
त्वंतत्रैव शिवादिपदशक्तिग्रहइतिवाच्यं। बीजाक्षराणां चतुर्थ्यंतत्वानियमात्। तदप्रतीतत्वेपि मंत्रप्रकाशितशशिरोषराधकपेतमुद्दिश्यहविस्त्या
गेनतत्रैव पाणिकानां देवताव्यवहारः बीजाक्षराणां हविस्त्यागभागित्वेनाननुदेश्यत्वात् शिवस्यप्रतीतं नृत्वबीजाक्षराणांनानात्वादेननुगमेनशिव
पदशक्तिग्रहस्याशक्यत्वाच्च। नचमूर्तिभेदेनशिवशरीराणामननुगतत्वेनतत्रापिनशक्तिग्रहइतिवाच्यं। ब्रात्यादिनाभिन्नशरीरेषु चैत्रत्वव्यवच्छिन्न
वत्वजातेः अदृष्टविशेषोपग्राहितत्वस्यवाऽनुगतत्वात्। अदृष्टस्यैव स्वस्य नदेवतात्वं ईशानश्चेतादिन्नस्यवा। तस्मात् मंत्रकरणकहविस्त्याग
भागित्वेनोद्देश्यत्वं देवतात्वं। अमेधाहविः संवत्सरमंत्रस्याद्देतुत्वादिति। नेवचिवाक्यशेषाप्रक्रियाहोपथापवमपश्चनुभवतितवाराहीचोपानवैतसेक

वि॰श देशप्रमाणप[illegible]मेतीतासत्त्ववपराहवेतसप्ताद्यः किंकंगुवापसज्जन्नावाचकाः उत्तदीर्घश्मश्रुकास्तकांवतुलानामिति श्लेष्ठायेव्यवहारादृशोनादिप्रति

६१ [illegible]त्रोपुस्मालानध्यवसायान्नस्पदव वैदेशग्रामारापानिश्चयेव्यवहाराध्यासतिः स्ववाविशिष्टः। पिकादिपदेषु म्लेच्छाव्यवहा। भुस्नेश्चकारसे ववर्म्म

गाकाकस्याणुयानहोसंभवादितिरूवपक्षे। वसंतेसर्वसस्यानांजायतेपत्रशातनं। मोदमानाश्चतिष्ठंतिपवाः कणिशशालिनः। वराहंगावोनु

धावंतिम[illegible]अुऊोवेतस्यइतिवाक्यशेषतयवेदविशेषविनीम्लेच्छप्रसिद्धिः स्मृतीगविवेदविरुद्धाहेयेतिनिरस्ता। म्लेच्छप्रसिद्धेर्निः प्रतिपक्षार्थत्व

बह[illegible]घ्यतिग्रहेः ननुवाक्यशेषात्सकारादिषुतात्पर्यनिश्चयेनशक्तिनिर्णयेः काकादिस्वदशातयास्सकारदोप्रयोगस्पोगेरपादिनापिसंभवादि

तिचेत्। न। गूकारस्दैतात्सर्पवत्शक्तेरपिनिश्चयात्। तथाहिपयध्यनादिप्रयोगयोगितानशक्तितावैदिकोगोगणादिनाव्यभिचारात्। तथापिशक्तिरना

दिप्रयोगनियतात्रतोवराहशदस्यानादिप्रयोगयोगिता